CC-0. In Public Domain. Digitization by eGangotri

श्री ५ पृथ्वीनारायण शाहको उपदेशको संस्कृत तथा नेपाली पद्यमयी व्याख्या

रचयिता
नयराज पन्त

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

नेपाल राजकीय प्रज्ञा-प्रतिष्ठान

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्री ५ पृथ्वीनारायण शाहको उपदेशको संस्कृत तथा नेपाली पद्यमयी व्याख्या

रचयिता

नयराज पन्त

नेपाल राजकीय प्रज्ञा-प्रतिष्ठान

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशक–
नेपाल राजकीय प्रज्ञा-प्रतिष्ठान
कमलादी, काठमाडौं ।

प्रथम संस्करण
वि० सं० २०४०

मूल्य– रू०

मुद्रक–
'प्रज्ञा–मुद्रण'
ने० रा० प्र० प्र०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

राष्ट्रनायक श्री ५ महाराजाधिराज वीरेन्द्र वीर विक्रम शाहदेव

संरक्षक

नेपाल राजकीय प्रज्ञा-प्रतिष्ठान

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्वर्गीय श्री ५ महेन्द्रबाट २०१४ साल आषाढ ९ गतेका दिन नेपाली साहित्य, कला र संस्कृतिको संरक्षण र संवर्द्धनको निम्ति प्रज्ञा-प्रतिष्ठानको स्थापना गरिबक्सेको हो ।

२०३१ साल वैशाख १ गतेका दिन राष्ट्रनायक श्री ५ महाराजाधिराज वीरेन्द्रवीरविक्रम शाहदेव सरकारको कृपापूर्ण संरक्षकत्व प्राप्त गरी नेपाल राजकीय प्रज्ञा-प्रतिष्ठानले नेपाली भाषा, साहित्य, कला, संस्कृति तथा ज्ञान-विज्ञानका क्षेत्रमा युगानुकूल विकास गर्ने सौभाग्य पाएको छ ।

नेपालको कला र संस्कृतिको गौरवमय इतिहास अत्यन्त प्राचीन, विशाल र आफ्नै किसिमको छ । आज राष्ट्रनायक श्री ५ महाराजाधिराज सरकारको वात्सल्यपूर्ण नेतृत्वमा जसरी बौद्धिक, आध्यात्मिक, आर्थिक र औद्योगिक विकासको ढोका उघ्रन खोजेको छ उसरी सिर्जनात्मक उपासनामा लागेका हाम्रा प्रतिभाशाली लेखक, कवि, कलाकार र विद्वान्हरूले पनि आफ्नो देशका कला, साहित्य र संस्कृतिको गौरवमय इतिहासलाई संसारसमक्ष परिचय गराउन सक्ने खालका कृतिहरू सिर्जना गरी आफ्ना-आफ्ना क्षेत्रमा महत्त्वपूर्ण योगदान गर्नेछन् भन्ने हामीलाई लागेको छ ।

राष्ट्रको गौरव बढाउने र नेपालको सौरभ फिंजाउने जस्ता महत्त्वपूर्ण कार्यमा नेपाल राजकीय प्रज्ञा-प्रतिष्ठानले सबैबाट सहयोग पाउनेछ भन्ने आशा गर्दछौं ।

लैनसिंह बाङ्गदेल

वैशाख १ गते २०३६

कुलपति

नेपाल राजकीय प्रज्ञा-प्रतिष्ठान

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकीय

दिव्य उपदेश घटनै घटनाभित्रका रचनै रचनाको संकलन हो । यो कर्मको भाषा हो र यसले कर्मलाई नै प्रेरित गर्छ । व्यक्तिको जीवन जस्तै राष्ट्रको पनि प्रादुर्भावको साथसाथै यसको अस्तित्वको संरक्षण र अन्तर्विकासका प्रवृत्तिहरूको पनि प्रादुर्भाव हुन्छ । दिव्य उपदेशको उपादेयता हिजो जति थियो, आज पनि उति नै छ र भोलि पनि उति नै रहन्छ । यस उपदेशको प्रारम्भमा नै हाम्रा राष्ट्र निर्माताबाट आज्ञा भएको छ– "बुढा मरै भाषा सरै भनि भन्छन्, तिम्रिहरू सबैछेउ सुनाइगयाको भया तम्रा सन्तानलाई सुनाउला र तम्रा सन्तानले हाम्रा सन्तानलाइ सुनाउनं र यो राजे थामि षानन्: ।"

प्रस्तुत काव्य दिव्य उपदेशको भावलाई विस्तारित गर्ने काव्य हो । यसमा संस्कृत खण्ड र नेपाली खण्ड गरी दुई खण्ड छन् । शैलीको चमत्कारले गर्दा उही विषय संस्कृतमा छन्दोबद्ध हुँदा ओज गुण र नेपालीमा छन्दोबद्ध हुँदा प्रसाद गुणले पूर्ण बन्न गएको छ । यस काव्यका रचयिता हुनुहुन्छ श्री नयराज पन्त । यस काव्यको रचनाबाट नीतिनिष्णात विद्वान्‌को साथै शैलीलाई आफ्नो अधीनमा राख्न सक्ने कविको रूपमा पनि उहाँको राम्रो परिचय पाइन्छ । यसबाट दिव्य उपदेशलाई झन् हृदयंगम गर्न र संस्कृत भाषाको माध्यमबाट देशान्तरमा परिचित गराउन पनि सकिनेछ । विद्वान्, कवि पन्तजीप्रति प्रज्ञा–प्रतिष्ठानको तर्फबाट धन्यवाद ज्ञापन गर्दछु ।

२६ चैत्र २०४०

माधवप्रसाद घिमिरे
उप-कुलपति
नेपाल राजकीय प्रज्ञा-प्रतिष्ठान

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समर्पण

श्री ५ पृथ्वीनारायण शाहको उपदेश
संस्कृत भाषामा सुरक्षित रहोरहोस्
भनी तयार गरिएको यो
संस्कृतपद्यमयी व्याख्या

श्री ५ पृथ्वीनारायण सम्बन्धी प्रामाणिक
वर्णन सङ्कलन गर्न अग्रेसर
ऐ. शि. बाबुराम आचार्य
[वि. सं. १९४४–२०२९]
लाई
सादर समर्पण गर्दछु ।

नयराज पन्त

वि. सं. २०४० फाल्गुन २९ गते सोमवार
(ऐ. शि. ज्यूको ९६ वर्ष पुगी ९७ वर्ष लाग्ने जन्मदिन)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तावना

जो बोल्छन् गहिरा र वास्तव कुरा धेरै गरो चिन्तन
पढ्ने मानिसका सबै भ्रम हरी जो माझिदिन्छन् मन ।
ती प्रामाणिक विज्ञ पाणिनि तथा कौटल्य श्रौ भास्कर
हाम्रो संमुखमा बसी गरिदिऊन् हाम्रा विचार स्थिर ॥

म प्रतिदिन अष्टाध्यायी उश्रन्छु, अष्टाध्यायीका उदाहरणको रूपमा भट्टिकाव्य र अमरकोशहरू पनि उश्रन्छु, यसरी म पाणिनिलाई सम्झीरहने प्रयत्न गर्दछु ।

म प्रतिदिन सिद्धान्तशिरोमणि उश्रन्छु, सिद्धान्तशिरोमणिमा उदाहरण पनि भएकाले उदाहरण खोज्न विशेष अरू ग्रन्थ नखोजे पनि हुन्छ । भास्करलाई सम्झीरहन उनैको ग्रन्थ पनि पर्याप्त छ ।

म प्रतिदिन सकेसम्म कौटलीय अर्थशास्त्र पनि पढ्छु । तर मेरो लेखा कौटलीय अर्थशास्त्र ज्यादै गाह्रो ग्रन्थ छ । त्यसका धेरै कारणमध्ये मुख्य कारण गुरुपरम्परा नहुनु हो ।

यस कारण उदाहरण खोजी पढ्न पाए कौटल्यका सूत्रका अर्थ लाग्दो हो भन्ने कुरा मेरो मनमा खेलीरहन्छ । कौटल्यका केही सूत्रका उदाहरण मैले श्री ५ पृथ्वीनारायण शाहको उपदेशमा पाएको छु । यस कारण श्री ५ पृथ्वीनारायण शाहको उपदेश मेरो लेखा पाठ्य ग्रन्थ हुन गएको छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आफ्नो बाईस वर्षको उमेरदेखि मैले नेपालको इतिहास पढ्न थालें । हाम्रो देशमा प्राचीन कालको इतिहास क्रमपूर्वक लेखिएको पाइँदैन । त्यस बेलाका मानिसहरूले बोलेका कुरा पनि क्रमपूर्वक पाइँदैनन् । यस कारण तिनीहरूको विषयमा पक्का कुरा भन्न अहिले गाह्रो पर्छ ।

नेपालको अर्वाचीन इतिहासमा श्री ५ पृथ्वीनारायण शाहको उपदेशबाट उनका जीवनका धेरै घटना थाहा पाइन्छन् । अरू तात्कालिक प्रमाणसँग भिडाई हेर्दा पनि सो उपदेशका कुराको प्रामाणिकतामा सन्देह रहदैन, यस कारण इतिहासको दृष्टिबाट पनि सो उपदेश मेरो लेखा पाठ्य ग्रन्थ हुन गएको छ ।

संस्कृतभाषामा श्री ५ पृथ्वीनारायण शाहको भाव सुरक्षित रहीरहोस् भनेर यस उपदेशको मैले संस्कृतभाषामा १३४ पद्यमा उल्था गरें । योगी नरहरिनाथको उद्योगले छापिएको संस्कृतभाषाको मासिक पत्र संस्कृत-सन्देशमा सो सम्पूर्ण अनुवाद छापियो पनि । वि. सं. २०१०-२०११ भर संस्कृत-सन्देश छापियो । यस अवधिमा संस्कृत-सन्देशका १२ खण्ड प्रकाशित भए । ती १२ खण्डमध्ये एघाह्रौं खण्ड छोडेर हरेक खण्डमा श्री ५ पृथ्वीनारायण शाहको उपदेशको मैले गरेको संस्कृतपद्यानुवादका अंश परेका छन् । त्यस बेला मेरो अनुवादको सम्पादन गर्ने काम नानी ज्ञानमणि नेपालले गरेका थिए ।

श्री ५ पृथ्वीनारायण शाहको उपदेशको नेपाली भाषामा ३७२ पद्यमा मैले गरेको अनुवाद जगदम्बा-प्रकाशनका प्रबन्धक श्रीकमल दीक्षितको प्रबन्धबाट वि. सं. २०२५ मा प्रकाशित भयो । त्यसका अङ्कको रूपमा श्री ५ पृथ्वीनारायण शाह सम्बन्धी अरू अरू कुरा पनि सँगसँगै प्रकाशित गरिए । अहिलेसम्म सो ग्रन्थका १५०० पृष्ठ छापिएका छन् । यस सम्पादन कार्यमा नानी देवीप्रसाद भण्डारी, धनवज्र वज्राचार्य, गौतमवज्र वज्राचार्य र दिनेशराज पन्तले प्रशंसनीय काम गरे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

"बाह्र वर्षमा मेरा भाई दलमर्दन् साहले जेठि तरवार रानाको थापलामा हाल्यो"

(यही ग्रन्थको २९ पृष्ठ)

भनी श्री ५ पृथ्वीनारायण शाहले बोलेका छन् । यहाँ राना भनेका जयप्रकाश मल्लका सेनापति जयन्त राना हुन् भन्ने सम्झी

"द्विःषड् वर्षोऽनुजो मे प्रथमदलपदो मर्दनः खड्गपाणि-
र्युद्धे प्रष्ठत्वमित्वा व्यधित यमपुरप्रस्थितं तं जयन्तम् ॥५४॥"

(संस्कृतसन्देश ५ अङ्कको २० पृष्ठ)

भनी मैले अनुवाद गरेको थिएँ । "नुवाकोटको लडाइँमा मारिएका जयन्त राना होइनन्, उनका छोरा शङ्खमणि राना हुन्, तिमीले लेखेको अशुद्ध भयो, संशोधन गर्नुपर्छ" भनी उसै वेला ऐ. शि. वाबुराम आचार्यज्यूले मलाई भन्नुभयो । अन्त पनि कहाँ कहाँ अशुद्ध छन् सो मलाई भनिदिनुहोस् न भनी मैले भनें । "अन्त त छैन, त्यही एक ठाउँमा मात्र हो" भनी उहाँले भन्नुभयो । यस कारण त्यसै बेलादेखि त्यसको संशोधन गर्नुपर्ने भयो । काल वित्तै गयो, संस्कृतका ३६६ पद्यमा मैले सो उपदेशलाई लेखें । मेरी जेठी बुहारी मिनूले सो साफी गरिदिइन् । नानी महेशराज र दिनेशराजले सम्पादन गरिदिए । नानी भोलानाथ पौडेलले आफ्नो संस्कृत पत्रिका मेधाको पहिलो अङ्कमा सो अनुवादको अलिकता भाग छापिदिए । त्रिभुवन-विश्वविद्यालयको संस्कृत-अध्ययन संस्थानद्वारा प्रकाशित हैमवतीको दोस्रो अङ्कमा वि. सं. २०३२ मा यसको बीचको अलिकता भाग प्रकाश भएको छ। पूर्णिमा का ४७, ४८, ४९, ५० र ५२ यी ५ अङ्कमा वि. सं. २०३७ देखि २०३९ सम्ममा संस्कृतका ३६६ पद्य प्रकाशित भए ।

अहिले नेपाल राजकीय प्रज्ञा-प्रतिष्ठानबाट ती संस्कृतका पद्य ग्रन्थको रूपमा प्रकाशित हुन लागेका छन् । श्री ५ पृथ्वीनारायण शाहको उपदेशको मूल पाठ र त्यसको संस्कृतच्छायानुवाद पनि परेका छन् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्री ५ पृथ्वीनारायण शाहको उपदेशको नेपाली पद्यात्मक व्याख्या पनि आवश्यक संशोधन गरी साथै प्रकाशित गरिएका छन् ।

अहिले देवीप्रसाद भण्डारीले सम्पादन, संशोधन आदि काम गरिदिएका छन् । यस काममा सहायता दिने सबैलाई यथोचित धन्यवाद छ ।

हाम्रा छैनन् विश्वविख्यात विद्वान्,
हाम्रा छैनन् दूरदर्शी कलावान् ।
हाम्रो आफ्नो छैन केही पदार्थ,
जेले पारौँ विश्वमा उच्च माथ ॥
॥ १ ॥
हाम्रो यस्तो दीनता क्यै हटाई
हामीलाई हौसला क्यै दिलाई ।
पार्ने हाम्रो चित्तमा सद्विवेक
जन्मेका छन् राजनीतिज्ञ एक ॥
॥ २ ॥
भित्री आस्था ली तिनैका पदार्थ
गुन्दै जाने जत्ति गर्दै यथार्थ ।
धेरै धेरै वर्ष मैले बिताएँ
जस्ता हुन् यी पद्यलाई उभ्याएँ ॥
॥ ३ ॥
जल्ले हेर्छन् भित्र राम्रो गढेर,
जल्ले गुन्छन् पक्षलाई त्यजेर ।
त्यस्तालाई ग्रन्थ यो हात जोर्छ,
ती जाँचून् यो ठीक बेठीक जे छ ॥
॥ ४ ॥

—नयराज पन्त

वि. सं. २०४० फाल्गुन २९ गते सोमवार

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषय-सूची

राज्ञः पृथ्वीनारायणशाहस्योपदेशस्य संस्कृतपद्यमयी व्याख्या १-१०९

विषय	पृष्ठ
उपक्रमः –	१-६
मङ्गलाचरणम् –	२
गोरखाराज्यस्य संस्थानम् –	२
पैतृके गोरखीये सिंहासने पृथ्वीनारायणशाहस्याऽऽरोहणम् –	२
नुवाकोटदुर्गस्य संस्थानं पृथ्वीनारायणस्य विजययात्रायाः प्रारम्भश् च –	२
मल्लभूपानां बलक्षयः –	३
पृथ्वीनारायणशाहस्याऽऽनिर्वेदः –	३
मकवानपुरदुर्गोपलम्भः –	३
नेपालं जिगीषोर् मीरकासीमस्य पराजयः –	३
नेपालं जिगीषवोऽङ्ग्रेजाः पराजिताः –	३
कान्तिपुरदुर्गोपलम्भः –	४
ललितपुरदुर्गोपलम्भः –	४
भक्तपुरदुर्गोपलम्भः –	४
लमजुङ्गेशादयो न जिताः –	४

क्र

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषय	पृष्ठ
चौदण्डीदुर्गोपलम्भः –	५
विजयपुरदुर्गोपलम्भः –	५
सुखिमसीमया समगच्छत नेपालसीमा –	५
नेपालस्यैकीकरणेच्छा	
पृथ्वीनारायणस्य क्षेत्रियो रोगश् च –	५
मन्त्रिवर्गस्य चिन्ता –	६
पृथ्वीनारायणस्यसन्निधावाचार्या ऽदीनाम् उपस्थानम् –	६
उपदेशस्य परम्परा –	६
पञ्च भ्रातरः –	७
श्वशुरकुले कटुर् अनुभवः –	७–८
चन्द्रागिरेः शिखराद् नेपालद्रोण्या दर्शनम् –	९–११
द्रुतगतिः –	११
मैध्यां सभा –	११–१३
मातुलस्योपदेशः –	१३–१७
लम्जुङ्शेन सह सन्धिः –	१८–१९
कालुपाँडेर् मन्त्रित्वम् –	१९–२०
पाँडे–बस्न्यातसम्बन्धः –	२०–२१
सल्यानकोटस्थाया देव्या उपासना –	२१–२५
सिमलचहुरे निवासः –	२५–२६
जयन्तरानाः –	२६–२८
दण्डयात्रामुहूर्तः –	२८–२९
नुवाकोटदुर्गोपलम्भः –	२९–३०
ककन्यां शिवपुर्यां च गुल्मौ –	३०
परशुरामथापाः –	३१–३३
नेपालद्रोणीस्थपुरत्रयदुर्गोपलम्भः –	३३–३४
साम्राज्यद्वयमध्यवर्ती लघुतरो देशः –	३४–३५
चीनचक्रवर्तिना सह सम्बन्धः –	३५–३७
आङ्लैः सार्कं सम्बन्धः –	३७–४५
दुर्गव्यवस्था –	४५–४७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषय	पृष्ठ
धर्मा ऽ धिकारस्थितीर् निबन्धुम् इच्छा –	४८–४९
याम्योत्तरगो मार्गः –	४९–५०
लोकस्थिते रक्षा –	५०–५१
दहचोकशिखरिणि राजधानी –	५१–५४
पर्साप्रदेशे विपणिः –	५४–५५
स्वदेशजं वस्त्रं परिधेयम् –	५५–५६
स्वदेशजं कुप्यं विदेशे निष्क्रम्यम् –	५६–५७
राज्ञः कोषः प्रजाः –	५७–५८
करग्रहणे क्रेतृसङ्घर्षरीतिर् न प्रवर्तनीया –	५८–५९
महामात्राः सैनिकाश् च धनं ना ऽ र्जयेयुः –	५९–६१
मया समुपार्जितम् इदं राष्ट्रम् उच्चावचजातिजानां सर्वासां प्रजानां साधारणी पुष्पवाटिका –	६१–६४
वंशक्रमा।ऽगतानि पदानि –	६४–६७
राजा स्वभृत्यान् स्वयं न हन्याद् नाऽपि घातयेत् –	६७–६९
अन्यायो रोधनीयः –	६९–७०
उत्कोचग्राही दण्डनीयः –	७०–७१
सैनिका आनुकूलिकं भोजनपर्याप्तं क्षेत्रखण्डं वेतनत्वेन लभन्तम् –	७१–७३
सांयुगीनाः पदवृद्धिं लभन्ताम् –	७३–७४
आयुधीया जातयः –	७४–७५
शस्त्रसंग्रहः —	७५–७६
योद्धारस् तत्सहायकाश् च –	७६
युद्धे हतस्य स्वसैनिकस्य गृहजनाय राजा जीविकां ददातु –	७६–७७
राज्ञा विवेकिना भाव्यम् –	७७–७८
राज्ञः सारः सैनिकाः प्रजाश् च –	७८
सैनिका उद्धर्षणीयाः –	७९
दुर्गपालानां नियुक्तिः –	७९–८०
तिरोजनपदा महत् पदं न लभेरन् –	८०–८१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषय	पृष्ठ
राजकीयं शासनं राजा स्वयं लेखयेत् –	८१–८२
योग्योऽन्तपालो राष्ट्रं रक्षति वर्धयति च –	८२–८३
राजा पितृपैतामहान् उपधाशुद्धान् भृत्यान् पार्श्ववर्त्तिनो विदध्यात् –	८३–८४
सैनिकाः प्रजाश् च परोपजापसहा न भवेयुर् इति राजा चिन्तयेत्	८४–८५
शुद्धरजतमयं रूप्यकं विधेयम् –	८५–८७
धर्माऽधिकरणव्यवस्था –	८७–८८
धर्माधिकरणात् समुत्थं धनं धर्म्यासु क्रियासु नियोक्तव्यम् –	८८–८९
आकरीयाया भूमेर् ग्रामोऽपसारणीयः –	८९–९०
केबारीयाया भूमेर् गृहम् अपसारणीयम् –	९०–९१
विप्रलम्भः –	९१–९३
नागानां (योगित्रुवस्य सैनिकानां) विनिपातः –	९३–९५
मीरकासिमस्य पराजयः –	९५–९८
आङ्गलानां पजयः –	९८–१०१
तिलङ्गनामा सैनिकवर्गः –	१०१–१०२
नेपालद्रोणीं मुगलभूपो जेष्यतीति लोकप्रवादः –	१०२–१०३
मुगलैः करिष्यमाणस्य विजयस्य निरोधस्योपायः –	१०३–१०४
सैन्यव्यवस्था –	१०४–१०५
तिरोजनपदस्य तीर्थत्रिकस्य बहिष्कारः –	१०५–१०८
उपसंहारः –	१०८–१०९
श्री ५ पृथ्वीनारायण शाहको उपदेशको पद्यात्मक व्याख्या –	१११–१९२
उपक्रम –	११३–११५
उपदेशको परम्परा–	११५
पाँच भाइ –	११६
ससुरालीको तीतो अनुभव –	११६–११७
चन्द्रागिरिबाट नेपाल–खाल्डाको दर्शन –	११७–११९
धपेडी –	११९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषय	पृष्ठ
मैधीको सभा –	११९–१२१
मामाको उपदेश –	१२१–१२४
लम्जुङसँगको सन्धि –	१२५
कालुपाँडेको मन्त्रित्व –	१२६–१२७
पाँडे वस्न्यातको सम्वन्ध –	१२७
सल्यानकोटको अनुष्ठान –	१२७–१३०
सिमलचउरको बास –	१३१
जयन्त राना –	१३१–१३२
साइत –	१३३
नुवाकोट-विजय –	१३३–१३४
ककनी र शिवपुरीमा चौकी –	१३४
परशुराम थापा –	१३४–१३७
नेपालखाल्डो–विजय	१३७
ढुङ्गाको तख्त –	१३७
चीनसँगको सम्वन्ध –	१३८–१३९
अङ्ग्रेजसँगको सम्वन्ध –	१३९–१४५
किल्लाको व्यवस्था –	१४५–१४७
स्थिति बाँध्ने इच्छा –	१४७–१४८
उत्तरदक्षिणको बाटो –	१४८–१४९
लोकस्थितिको रक्षा –	१४९
दहचोकमा राजधानी –	१५०–१५१
पर्सामा बजार –	१५२
स्वदेशी कपडाको व्यवहार –	१५२–१५३
स्वदेशी वस्तुको निकासी –	१५३
राजाका धन दुनियाँ हुन् –	१५३–१५४
कर उठाउन ठेक्का नदिनू	१५४–१५५
भारदार र सैनिकहरूलाई धन कमाउन नदिनू	१५५–१५६
मैले आर्जेको मुलुक छोटा बडा सबै जातको साझा फूलवारी हो –	१५७–१५९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषय	पृष्ठ
वंशक्रमागत पद –	१५९–१६१
राजाले सेवकलाई घरमा नमार्नू –	१६१–१६२
अन्याय हुन दिनु हुँदैन –	१६२–१६३
घुस्याहालाई ठोक्नैपर्छ –	१६३–१६४
सिपाहीलाई पायक पर्ने, खान पुग्ने जग्गा दिनू –	१६४–१६५
लडाइँमा जस पाएकालाई माथि उकालि दिनू –	१६५–१६६
लडाका जात –	१६६
शस्त्रसङ्ग्रह –	१६६–१६७
लडाका र तिनका सहायक –	१६७
मरवट –	१६७–१६८
राजाले विवेक राख्नुपर्छ –	१६८
सिपाही र दुनियाँ राजाका सार हुन् –	१६८
सिपाहीलाई तिखार्दै रहनू –	१६८–१६९
दुर्गपालको छनोट	१६९
अजानपदलाई ठूलो अधिकार नदिनू –	१७०
लालमोहर राजाबाटै हुनुपर्छ –	१७०–१७१
योग्य अन्तपालले देशको उन्नति गर्छन्	१७१–१७२
पुराना योग्य मानिसलाई जाँची हजुरिया बनाउनू –	१७२–१७३
प्रजालाई र सैनिकलाई अन्त लहसिन नदिनू –	१७३
शुद्ध चाँदीका मोहर रुपियाँ चलाउनू –	१७३–१७५
न्यायालय –	१७५–१७६
न्यायालयबाबाट आएको आम्दानी धर्मकर्ममा लाउनू –	१७६–१७७
गाउँ हटाएर पनि खानि चलाउनू –	१७७–१७८
घर हटाएर पनि खेत बनाउनू –	१७८
धोका –	१७८–१७९
नागा मारिए –	१८०–१८१
मीरकासिमको हार –	१८१–१८३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषय	पृष्ठ
अङग्रेजको हार –	१८४–१८७
तिलङ्गा –	१८७
नेपाल खाल्डोलाई मुगलले जित्नेछन् भन्ने हल्ला –	१८७-१८८
मुगललाई हराउने उपाय –	१८८
जङगीबन्दोबस्त –	१८९
विदेशी नाचगानको बहिष्कार –	१९०-१९१
उपसंहार –	१९१–१९२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

राज्ञः पृथ्वीनारायणशाहस्योपदेशस्य संस्कृतपद्यमयी व्याख्या

उपक्रमः

मूलपाठः

स्वस्ति श्रीगणेशाय नमः ।। ।। श्रीकालिका सहाः ।। ।।
श्री ३ सिव गोरषनाथ सहाः ।। ।। श्री ५ प्रिथिनारायण सहाः ।।

श्रीश्रीश्री ५ बुढा महाराजाले तिन सहर नेपाल र हिंडुपतिको राज लियापछि पछिल्ला पटक् नुहाकोटमा पाउलाग्नुभयामा गुरू प्रोहित थरघर भैयाद भारादार र आफ्ना ददा सुरथिसि राना सबैका बुढापाकाछेउ हुकुम भयाका कुरा.

संस्कृतच्छाया

स्वस्ति । श्रीगणेशाय नमः । श्रीकालिका सहायिका भवतु ।
श्रीशिवगोरक्षनाथौ सहायकौ भवताम् ।

अथाऽतो दिवङ्गतस्य महाराजाधिराजस्य पृथ्वीनारायणशाहस्य विषयः। स महाराजाधिराजो नेपालद्रोणिभाञ्जि त्रीणि राज्यानि हिन्दुपतिपदभूषितानां सेनानां च त्रीणि राज्यानि विजित्य स्वकीयेऽन्तिमे काले नुवाकोटम् अगच्छत् । तत्र स्वनिधनात् पूर्वम् आचार्यान् पुरोहितान् षट्कुलीनान् मौलान् बन्धून् महामात्रान् स्वबाल्योपस्थापकं रानावंश्यं सुरथसिंहम् अन्यांश्च ज्ञानवृद्धान् वयोवृद्धांश्च स्वसन्निधौ सन्निपात्येमां वाचम् अकथयत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पद्यमयी व्याख्या

मङ्गलाचरणम्

भक्तानां सिद्धिदाया भवतु गणपतिर् विघ्नविध्वंसकारी,
सैन्यैः सार्धं व्रजन्ती क्षपयतु समरे कालिका शत्रुतेजः ।
स्मेरा ।ऽ स्यश् चन्द्रचूडो भवतु पशुपतिश् चित्तसन्तापहारी,
योगी गोरक्षनाथो वितरतु सततं भावनां शुद्धरूपाम् ।।१।।

गोरखाराज्यस्य संस्थानम्

याम्ये पार्श्वे हिमाद्रेर् धनददिशि महाभारता ।ऽ ख्याद् महीध्राद्
मध्ये चम्पात्रिशूल्योर् वनगिरिवहुलं गोरखाराज्यमासीत् ।

धनददिशि=उत्तरस्याम्

पैतृके गोरखीये सिंहासने पृथ्वीनारायणशाहस्या ।ऽरोहणम्

शाहा ।ऽ ख्यक्षत्रवंश्यो नवनवगिरिभू १७९९ वैक्रमा ऽ ब्दे नखा ऽ २०ब्दः
पृथ्वीनारायणोऽत्र स्वकुलसमुचितं भूमिपालत्वमाप ।।२।।

नुवाकोटदुर्गस्य संस्थानं
पृथ्वीनारायणस्य विजययात्रायाः प्रारम्भश् च

प्राच्ये शूलोद्भवाया गिरिशिरसि नुवाकोटनाम्ना प्रसिद्धं
पाश्चात्त्यं सीमदुर्गं धनकरमभवत् कान्तिदेशा ऽ धिपस्य ।
पण्या ऽ ध्वा भोटगामी धरणिरपि कृपेस् तेन संरक्ष्यते स्म,
यात्रा ऽ ऽ दौ गोरखेशो विधुखगजमही १८०१ वैक्रमा ऽ ब्दे
ऽ जयत् तत् ।।३।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मल्लभूपानां बलक्षयः

नेपालद्रोणिदेशे कृतनिजकटकान् मल्लवंश्यान् नृपाँस् त्रीन्
षाड्गुण्यं सेवमानः स नृपतिरकरोत् क्षीणशक्तीन् क्रमेण ।

द्रोणिः = पर्वतपरिवृता भूमिः

कटकः = राजधानी

पृथ्वीनारायणशाहस्या ऽ निर्वेदः

पृथ्वीनारायणेशं रणभुवि विजयश्रीः कदाचित् सिषेवे,
मल्लेशांस् तद्विपक्षान् अपि करुणदृशा सा कदाचिद् ददर्श ॥४॥
लेभे भङ्गं महान्तं रणभुवि बहुधा किन्तु गोरक्षराजश्-
चित्ते भङ्गं न लेभे क्षपितबहुजनो जातभूरिव्ययो ऽ पि ।

मकवानपुरदुर्गोपलम्भः

देशं माकन्दसंज्ञं द्विरदवनवृतं सेनभूपालराज्यं
सस्या ।ऽ ढ्यं गोरखेशो नवविधुगजभू १८१९ वैक्रमाब्दे जिगाय ॥५॥

नेपालं जिगीषोर् मीरकासीमस्य पराजयः

बङ्गालक्ष्मा ऽ। धिपालो यवनकुलज।नर् मीरकासीमनामा
नेपालं जेतुमैच्छद्, नवशशिगजभू १८१९ वैक्रमे तस्य सेना ।
आयाद् माकन्ददेशं, यवननृपचमूर् गोरखाधीशचम्वा
घोरे युद्धे विजिग्ये, क्षपितनिजबला प्राद्रवद् म्लेच्छसेना ॥६॥

नेपालं जिगीषवो ऽ ङ्ग्रेजाःपराजिताः

नेपाले भोटदेशे ऽ पि च सितवदनाः सार्थवाहा भवन्तु
सम्यग् लब्धप्रवेशा इति सितवदनश्रेणिनाथो ववाञ्छ ।
नेपालं जेतुमिच्छोः श्रुतिभुजगजभू १८२४ वैक्रमे तस्य सेना
गोरक्षा ऽ धीशचम्वा सिंधुलिपरिसरे निर्जिता द्राविता च ॥७॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कान्तिपुरदुर्गोपलम्भः

कान्त्याख्यां राजधानीं सुरगृहबहुलां कान्तिदेशाऽधिपस्य
मूलं दुर्गं विजिग्ये शरभुजगजभू १८२५ वैक्रमे गोरखेशः ।

ललितपुरदुर्गोपलम्भः

आत्माऽभीष्टं मनुष्यं धरणिपतिपदे मन्त्रिभिः स्थापयद्भिः
स्वैरं संभुज्यमानं सुखमजयदसौ पाटनं वत्सरेऽस्मिन् ॥८॥

अस्मिन् वत्सरे= १८२५ वैक्रमाब्दे

भक्तपुरदुर्गोपलम्भः

भग्नाभ्यां भूपतिभ्यां सममवनिभुजा स्वेन चेति त्रिसङ्ख्यैर्
नेपालद्रोणिपालैः शरणमिति धिया संश्रितं दुर्गरूपम् ।
भक्तग्रामं स्वसैन्यैः परित उपहतं कारयन् योधयँश् च
घस्त्रत्रय्या ३ विजिग्ये रिपुभुजगजभू १८२६ वैक्रमे गोरखेशः ॥९॥

भग्नाभ्यां भूपतिभ्याम्= पराजयं प्राप्य पलायिताभ्यां
कान्तिपुराधीशललितपुराधीशाभ्याम्

लम्जुङ्शायदो न जिताः

प्राच्यान् उन्मूल्य भूपान् निगम ४ परिमितान् गोरखाभूमिपालः
पाश्चात्त्यान् जेतुकामो धरणिपरिदृढान् प्रेषयामास सेनाम् ।
लेभे साफल्यमादौ रणभुवि पृतना गोरखेशस्य किन्तु
पश्चात् पाश्चात्त्यभूपैः समुदिततरसा निर्भरं सा विजिग्ये ॥१०॥
पाश्चात्त्या गोरखीयान् कतिचिदवधिषुर् द्रावयन्ति स्म शेषान्,
पाश्चात्त्यं भूमिखण्डं लघुतममपि नो गोरखाऽधीश आप ।
पृथ्वीपालाः प्रतीच्याः समुदितपृतना गोरखीयां धरित्रीं
जेतुं युद्धानि चक्रुः समरभुवि परं नैव साफल्यमापुः ॥११॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चौदण्डीदुर्गोपलम्भः

प्राच्यं राज्यं किराताऽभिधजनबहुलं कौशिकीनीरसिक्तं
चौदण्डीनामधेयं द्विरदवनवृतं भूरिकेदारशालि ।
सेनाऽख्यक्षत्रवंशोद्भवधरणिभुजा भुज्यमानं जिगाय
गोरक्षेशो विहायोज्वलनगजमही १८३० संमिते बैक्रमाब्दे ।।१२।।

केदारः= क्षेत्रम

विजयपुरदुर्गोपलम्भः

राईसाचिव्ययुक्तं सचिववशगतं राजपीठस्थसेनं
चौदण्डीतुल्यरूपं विजयपुरमथो द्राग् विजिग्ये स भूपः ।।

सुखिमसीमया समगच्छत नेपालसीमा

जित्वा त्रीन् मल्लवंश्यान् धरणिपरिवृडांस् तावतः सेनवंश्यान्
प्राच्यां नेपालसीमां सुखिममुपगतां गोरखेशश् चकार ।।१३।।

माकन्दपुरं कान्तिपुरं ललितपुरं भक्तपुरं चौदण्डी विजयपुरं चेति षड राज्यानि पृथ्वीनारायणो जिगाय ।

नेपालस्यैकीकरणेच्छा

पृथ्वीनारायणस्य क्षेत्रियो रोगश् च

आसन्नत्रिंश ३० वर्षैर् नयनिपुणमतेर् गोरखेशस्य कृत्या
प्राच्या नेपालभागाः पुनरपि मिलिता एकसूत्रे बभूवुः ।
आशायां पश्चिमायां प्रणिहितनयनं तं नुवाकोटमाप्तं
द्वापञ्चाशत् ५२ समीनं धरणिपरिवृढं क्षेत्रियो व्याधिराप ।।१४।।

क्षेत्रियः= दुश्चिकित्स्यः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मन्त्रिवर्गस्य चिन्ता

व्यर्थे वैद्योपचारे ऽ नुदिनमवनिपे ग्लानिमापद्यमाने
दीने वर्गे स्वकीये रिपुजनहृदये तोषमापत्स्यमाने ।
निर्वाणे ऽ स्मिन् प्रदीपे घनतमसि कथं दर्शनीयः सुमार्ग
इत्थं चिन्तानिमग्नो नतमलिनमुखो मन्त्रिवर्गो बभूव ॥१५॥

पृथ्वीनारायणस्य सन्निधावाचार्या ।ऽ दीनाम् उपस्थानम्

भूपालः स्वीयमृत्युं सविधमुपगतं रोगरूपाद् विवेद,
रोगा ।ऽ र्त्तोऽप्यात्मवत्त्वाद् नयनिहितमना भावि कार्यं स दध्यौ ।
राज्ञा ऽऽ चार्यः पुरोधा नरपतिकुलजा मौलवर्गः प्रधाना
बाल्योपस्थापकः स्वः स्थविरबुधजना ऊचिरे सन्निपात्य ॥१६॥

उपदेशस्य परम्परा

मूलपाठः

बुढा मरे भाषा सरे भनि भन्छन्. तिमिहरू सबैछेउ सुनाइगया।को भया तम्रा सन्तानलाइ सुनाउला र तम्रा सन्तानले हाम्रा सन्तानलाइ सुनाउनं र यो राजे थामि थानन्ः ॥

संस्कृतच्छाया

वृद्धे मृते तद्भाषा ऽ। न्यत्र वासं करोतीति लोकाः कथयन्ति । सर्वान् युष्मान् स्वकीयम् अनुभवं श्रावयित्वा चेद् गच्छेयं यूयं स्वाः सन्ततीस् तं श्रावयेत । युष्माकं सन्ततयश् चा ऽ स्माकं सन्ततीस् तं श्रावयेयुः । ताश् चैतद् राज्यम् आत्मानं च रक्षेयुः ।

पद्यमयी व्याख्या

नानारूपान् मनुष्यो ऽ नुभवति विषयान्, बुध्यते तेन किञ्चिद्,
अन्यान् बोधं स्वकीया ऽनुभवसहचरं श्रावयित्वा ऽ। स्तमेति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तस्माद् आत्मा ऽ नुभूत्या सह हृदयगतं भावि कर्तव्यजातं
युष्मान् भाषे, यदीयाः कथयत च कथा यूयमात्मप्रजाभ्यः ॥१७॥
युष्मद्वंश्या वचोभिः श्रुतिविषयगतैर् मामकीनैः स्ववंश्यान्
अस्मद्वंश्यांश् च सम्यक् परिचितविनयान् कुर्वतां राजधर्मे।
वंश्यास् ते ऽ स्मान् स्मरन्तो ऽ नुगमनमपि नः स्वक्रियाभिश् चरन्तु,
तद्नीत्या वीर्यशालि प्रथितशुभयशो भातु नेपालराष्ट्रम् ॥१८॥

पञ्च भ्रातरः

मूलपाठः

॥ उप्रान्तः ॥ हाम्रा मुमाहरू तिन हुन्. हामि तिन षोपिका पाचपाण्डुवाको अवतार भयाका थिञुं.

संस्कृतच्छाया

अथा ऽ स्माकं तिस्रो जनन्य आसन्। ताभ्यो वयं पञ्च भ्रातरः पाण्डवा इवा ऽ जायामहि।

पद्यमयी व्याख्या

अस्माकं ज्येष्ठमाता तनयविरहिता ऽऽसीद्, अथो पञ्च पुत्रान्
अस्मांस् तिस्रो जनन्यो ऽ सुवत समरुचीन् पञ्चभिः पाण्डुपुत्रैः।

श्वशुरकुले कटुर् अनुभवः

मूलपाठः

मेरो बिबाहा मकुवानपुरमा भयाको थियो. डोला सुम्पेको थियन र डोला पनि लैयाउ. नेपाल पनि देषि आउ भनि मकुवानपुर गञु र पुग्यपछि दिकबन्दसेनलाई यवटा कुराको फरेंउलि लियेर भने. यकदन्ता हाति र नवलाषि हिराको हार दिन्छौ भने डोला पनि लैजाला. दिन्न भन्या काढि तरवारसित पनि लैजाला भनि हाक पारि.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

मम विवाहो मकवानपुरे तदधिपतेः पुत्र्या सहा ऽ भवत् । नववधूः पितृगृह एवा ऽसीत् । नववधूं स्वं गृहम् आनेतु नेपालद्रोणीम् अपि द्रष्टुं मकवानपुरम् अगच्छम् । तत्र श्यालं दिग्बन्धनसेनं दन्तिमुख्यम् एकदन्तं नवलक्षमूल्यं हीरकहारं च यौतकत्वेन दद्याश् चेद् नववधूं नयेयम्, न दद्याश् चेत् खड्गेन प्रहृत्य नयेयम् इति सा ऽ वष्टम्भं कथयित्वा ऽ हम् आह्वये ।

पद्यमयी व्याख्या

माकन्देशस्य पुत्र्या सह परिणयनं मे ऽ भवद् बालिकेति
देशाऽचाराऽनुरोधाद् निजजनकगृहं ना ऽ जहात् सा नवोढा ।।१६।।
आनेतुं स्वां द्वितीयां निजसदनमथो वाग्वतीनीरसिक्तं
नेपालद्रोणिदेशं नयनपरिचितं कर्तुमिच्छा ममा ऽ भूत् ।
आत्मीयैः सार्धमापं श्वशुरकुलमहं, दृप्तचेता धनेन
श्यालो दिग्बन्धनस् तु व्यधित समुचितां सत्कृतिं मे न तत्र ।।२०।।
आचारा ऽ तिक्रमेणा ऽ नुभवति हृदये पीडनं, जायमाने
कोपे, गर्वं धनोत्थं निरसितुमवदं सेनभूपालपुत्रम् ।
सम्पन्नो ऽ भूद् विवाहो मखविधिसहितः कन्यकादानपूर्वः,
सा ऽ लङ्कारा कुमारी सविधि वरकरे शास्त्ररीत्या व्यतारि ।।२१।।
सा ऽ लङ्कारा कुमारी निजपतिसदनं प्रापिता यानरूढा,
ते ऽ लङ्काराश् च यानं तदपि नियमतो वर्तते दत्तपूर्वम् ।
तस्माद् हीरैर् महा ऽर्घैः शशिकरविमलैर् ग्रथ्यमानः स हारो
दन्तीन्द्रश् चैकदन्तस् तव निजभगिनीयौतका ऽ र्थे प्रदेयः ।।२२।।
श्रुत्वा वाचं मदीयां प्रकुपितमवदं राजपुत्रं पुनस् तम्
नो दद्याश् चेद् हरेयं प्रसभमहमिदं स्वेन कौक्षेयकेण ।
वैरे प्रत्यक्षरूपे श्वशुरकुलजनैः सार्द्धमेवं प्रजाते
जायां तत्रैव हित्वा बहिरगममहं हेमकर्णस्य गेहात् ।।२३।।

कौक्षेयकेण= खड्गेन

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चन्द्रागिरेः शिखराद् नेपालद्रोण्या दर्शनम्

मूलपाठः

नेपाले राजाले चिन्नन् र पक्रनन् भनि स्याषु वढि रापतिका तिरैतिर भानु जैसि कुलानन्द जैसि अरु थरघर पनि साथैमा थिया. चन्डागिरिमा आइपुग्यांपछि नेपाल कुन् हो भनि सुध्याजा र त्यो भादगाउ हो. त्यो पाटन् हो. त्यो काठमाडौ हो भनि देषा(या) र मेरा मनमा इ तिनै सहरको राजा हुन पाया ता हुदो हो भन्ने यस्तो मनमा परिरहेथ्यो. उस्तै बेलामा उ दुवै जैसिले भने. हजुरको मनकान्छ्या अविलाष् पुग्ला महाराजा भन्या र मलाई आसर्जे लाग्यो र मेरा पेटका कुरा कसो गरि जानेउ र तेस्व भनेउ र भनि मैले भन्दा जसै नेपालमा नजर दिनुभयोथ्यो. उसै वेला मोचमा वाहुलि डिदा मनमा नेपालको राजा हुन पाया ता हुँदो हो भन्या जस्तो परेछ भनि विन्ति हजूरमा गन्याकै हो भने र यो कुरा पुग्ला भनि मैले भन्दा हजूरले गौ ब्रह्मान भतित फकिर देउदेवताको मानिता बहुतै राषनुभयाको छ. हाम्रा हातमा पनि सरसोतिको वर्दान छ. हजूरलाई नेपालको राज बस्य हुन्यैछ भने र

संस्कृतच्छाया

नेपालद्रोणीनाथाः परिचिनुयुश् चेत् प्रगृह्णीयुर् इति पर्णनयेन च्छत्रेण संछन्नाङ्गो दैवज्ञाभ्यां भानुकुलानन्दाभ्याम् अन्यैश् च पट्कुलीनैर् मौलैः सह रापतीतीरमार्गेण प्रचलन्नहं चन्द्रागिरिशिखरं प्राप्नवम् । कुत्राऽस्ते नेपालद्रोणीति तत्र स्वजनान् अपृच्छम् । अयं भक्तग्रामः, इदं ललितपत्तनम्, अयं च काष्ठमण्डप इति नामग्राहं ते जना नेपालद्रोणीम् अदर्शयन् । आसां तिसृणां पुरीणां राजा भवेयम् इति कामो मम मनसि तदानीम् अजायत । राजन् भवदीयो मनोरथः पूर्णो भवत्विति तदानीम् एव तावुभावपि दैवज्ञावभासेताम् । तच् श्रुत्वा विस्मेरचेता अहं तौ दैवज्ञौ मामकीनं मनोरथं युवां कथम् अज्ञासिष्टं कथम् एतद् अवादिष्टम् इत्यवदम् । नेपालद्रोणीं चक्षुर्भ्यां पश्यतो भवतो बाहुर् गुञ्जास्त्रंसनोऽभूत्, तदानीं नेपालद्रोणीभूपो भूयासम् इति वाञ्छा भवतो हृदये समुदपादि,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अत आवाभ्याम् एषा विज्ञप्तिर् अकारीति तावत्कथ्यताम् । कच्चिद् एषा वाञ्छा सफला भवेद् इति मयि पृच्छति तावववदताम्—भवान् गां ब्राह्मणम् अतिथिं योगिनं देवं च सत्कुरुते, आवाभ्याम् अपि सिद्धिदा सरस्वती सेव्यते, भवान् नेपालद्रोणीं पुरा जयति ।

पद्यमयी व्याख्या

मल्ला भूपालका मां यदि परिचिनुयुः प्रग्रहं मे विदध्युर्
इत्याशङ्काऽऽकुलत्वाच् छदनविरचितच्छत्रसंछादिता ऽङ्गः ।
ज्योतिर्विद्भ्यां च मौलैः सह गतिमभजं रापतीतीरसृत्या
मन्दं मन्दं च चन्द्रागिरिशिखरमगां दिक्षु विक्षिप्तचक्षुः ।।२४।।

सृतिः= मार्गः

अगाम्=अगमम्

नेपालद्रोणिदेशः क्व विलसति, पुरस् तद्भवाः कुत्र तिस्र
इत्थं पृष्टा मया स्वे ऽभ्यधिषत नगरीर् दर्शयन्तो ऽङ्गुलीभिः ।
भक्तग्रामः पुरस्ताद् विलसति, ललितं पत्तनं मध्यभागे,
किञ्चित् तस्माद् उदीच्यां निवसति नगरी कान्तिरीक्षस्व देव ।।२५।।

अभ्यधिषत=अकथयन्

नेपालद्रोणिसंस्थं त्रितयमपि पुरां सस्पृहं पर्यदर्शं,
भूयासं भूप आसाम् इति मम हृदये कामना चोदपादि ।
तस्मिन् काले न्यगादीद् बत गणकयुगं मे मुखं वीक्षमाणं,
त्वच्चित्ते वर्तमाना नृपवर भविता कामना पूरितेति ।।२६।।
तच् श्रुत्वा विस्मितः सन् पुनरवदमिमौ, मानसो मामकीनो
भावो ज्ञातो युवाभ्यां कथमथ विदिता तद्भवा पूर्णतेति ।
दैवज्ञाभ्यां ततो ऽहं न्यगदिषि, नगरीर् वीक्षमाणस्य ते ऽभूद्
गुञ्जायां बाहुरस्मात् त्रिपुरविषयका ते जिगीषा ऽऽन्वमायि ।।२७।।

गुञ्जा=उत्तरोष्ठोपरि प्ररूढा रोमराजिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भूयः श्रद्धा ऽ। न्वितः सन्नगदमहमियं कालिकी कामना नः
किं पूर्णत्वं प्रयायाद् इति गणकवरौ व्याहृषातां ततो माम् ।
गां देवं भूमिदेवं यतिमतिथिजनं शुद्धभक्त्या ऽ।र्चसि त्वम्,
आवाभ्यां सिद्धिदात्री प्रकटितमहिमा भारती सेविता ऽऽ स्ते ॥२८॥

कालिकी =दीर्घकालानुगता

व्याहृषाताम्=अकथयताम्

वाचो देव्याः प्रसादाद् अधिगतसुवरौ ब्रूवहे सत्यमेतद्,
नेपालद्रोणिसंस्था नृपतिवर पुरा त्वां वृणीते नृपश्रीः ।

पुरा वृणीते निश्चयार्थविशिष्टे भविष्यति लट्

द्रुतगतिः

मूलपाठः

थांकोट्को ठुलो भन्ज्यान् काटि रात दिन गरि कल्हारि घाट तरि धादिंन् उक्लेउ र

संस्कृतच्छाया

थाङ्कोटपर्वतस्या ऽधित्यकामार्गेण तं पर्वतम् उल्लङ्घ्य रात्रिन्दिवं प्रचलन्तो वयं कह्लेरितीर्थे त्रिशूलीं नदीं तीर्त्वा धादिङ्पर्वतशिरम् आरोहाम ।

पद्यमयी व्याख्या

अद्रेस् थाङ्कोटनाम्नः शिखरगपदवीं लङ्घयित्वा त्रिशूलीं
तीर्त्वा कह्लेरितीर्थं द्रुततरगतयो धादिङं कूटमैम ॥२६॥

मैध्यां सभा

मूलपाठः

चेप्याको षावा लिग्लीग्को आड गरि राषेका मेरा तिन बिर छन्. तिनलाई बोलाहाटको रूका लेषन जैसि भन्दा तिनको नाउ के के हो भनि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सुध्याया र रणजित् बस्न्यात् मानसिं रोकाहा विरभद्र पाठक् मैंधिमा रातदिन गरि आइपुक भनि लेषी पठाजा र आईपुगे र तिनछेउ यकान्त गऱ्या (र) भने. दिकबन्दसेनसित हाक दि आजों. नेपाल पनि देषि आजों. हान्नाको मनसुबा पनि राषी आजों तिमिहरू क्या भन्छौ भनि मैंले भन्दा हान्नुहवस् मांहाराजा भने र सल्लाहा दिया र मैंले भने. म जसै अर्काको छत्रभङ्ग गर्न जांछु. मेरो छत्रभंग गर्न अर्को आयो भन्या कसो होला भनि मैंले भन्दा हजूरका हातिहउवा ई बाइस् चौबिसि आयो भन्या चेप्यामा रगतको नदि बहाउला. महाराजा भन्या र यकान्तबाट उठि गोर्षा गयउ र.

संस्कृतच्छाया

चम्पावतीं नदीं परिखीकृत्य लिगलिगपर्वतशिखरे दुर्गं विरचय्य मम त्रयो दुर्गपाला वसन्ति स्म । तेषाम् आह्वानाया ऽऽज्ञापत्रं लिख दैवज्ञेति मया कथितो दैवज्ञस् तेषां नामानि माम् अपृच्छत् । बस्न्यातोपनामको रणजिद् रोकाहोप-नामको मानसिंहः पाठकोपनामको वीरभद्र इति मया कथिते शीघ्रं मैंधीम् आगच्छतेत्याज्ञापत्रं तेषां समीपं प्राहीयत । यथाज्ञं ते मैंधीम् आगच्छन् । रहसि तैः सह मन्त्रणां कुर्वन्नभाषे । दिग्बन्धनसेनं युद्धाया ऽऽहूय नेपालद्रोणीं च विलोक्य परावृत्तो ऽस्मि , नेपालद्रोणीं जिगीषामि , अस्मिन् विषये युष्मदीयं भावं जिज्ञास इति । राजन् युद्धाय याहीति ते ऽवदन् । अन्येषां राज्यानि जेतुं मयि प्रस्थिते मम राज्यं जेतुम् अन्य आगच्छेच् चेत् का दशा स्याद् इति मयि ब्रुवाणे कर्णालीनीरसिक्तां भूमिं प्रशासतो द्वाविंशती राजानो गण्डकीनीरसिक्तां भूमिं प्रशासतश् चतुर्विंशती राजानो गेहेशूरा एव सन्ति , ते भवदीयं राज्यम् आगच्छेयुश् चेच् चम्पावतीं रुधिरमयीं कुर्यामिति ते ऽवदन् । ततो रहोमन्त्रणां समाप्य गोरखाम् अगच्छम् ।

पद्यमयी व्याख्या

सीमात्राणाय पाथःपतिदिशि परिखीकृत्य चम्पां स्रवन्तीं
कृत्वा दुर्गं बलीयो लिगलिगशिखरे तस्थुषो दुर्गपांस् त्रीन् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आह्वातुं शासनं स्वं गणकविलिखितं प्रेषयामि स्म, ते ऽपि
मंधीम् आयन् यथाज्ञं द्रुततरगतयस्, तान् विविक्ते ब्रुवे स्म ॥३०॥

पाश्चःपतिदिशि=पश्चिमायाम्

स्रवन्तीम्=नदीम्

आह्वे माकन्दपृथ्वीपरिवृढतनयं युद्धभूमौ समेतुं,
नेपालद्रोणिभाजां स्थितिमपि तिसृणां पर्यपश्यं पुरीणाम् ।
सेनं भूपं च मल्लान् धरणिपरिवृढाञ् जेतुकामो ऽहमस्मि,
कार्ये ऽस्मिन् युष्मदीयां हृदयविलसितां भावनां संबुभुत्से ॥३१॥

आह्वे=आह्वानम् अकरवम्

संबुभुत्से=ज्ञातुम् इच्छामि

आकर्ण्योक्ति मदीयां समरविषयकं दर्शयन्तः स्वकीयम्
उत्साहं दुर्गपाला अगदिपुरवनीनाथ वाञ्छा त्वदीया ।
स्थाने जाता, जिगीषा श्रयतु सफलतां शीघ्रमेषा तवेति,
निश्चेतुं भावि कृत्यं समरविषयकं भूय एतान् अवोचम् ॥३२॥
प्राचीं जेतुं प्रयाते मयि मम विषयं शून्यमूलं विभाव्य
सङ्घीभूय प्रतीच्या धरणिपरिवृढाः पार्ष्णिमादातुकामाः ।
सीमा ऽऽन्तं पीडयेयुः, कथमिव विपदः स्याद् अमुष्या विमुक्तिर्
एतां वाचं विधाय श्रुतिविषयगताम् अब्रुवन् दुर्गपालाः ॥३३॥
कर्णालीगण्डकीभ्याम् उपहृतसलिलाञ् शासतो भूमिभागान्
गेहेशूराः प्रतीच्या यदि नरपतयो गोरखां पीडयेयुः ।
तेषाम् उष्णैर् असृग्भिः शितशरनिकरोत्कृत्तगात्रस्रवद्भिश्
चम्पावत्याः स्रवन्त्या वयमपि सलिलं लोहितं कारयेम ॥३४॥
श्रद्धा विज्ञाय भावं हृदयसमुदितं दुर्गपालत्रयस्य
मन्त्रस्थानं विहाय स्वगृहमहमगां गोरखां राजधानीम् ।

मातुलस्योपदेशः

मूलपाठः

पुगेपछि मामाज्यू पनि निलकंण्ठ पशुपतिको दर्शनलाई देउघाटको बाटो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गरि जानुभयाको रहेछ. निलकंण्ठ पसुपतिको दर्सन भयापछि श्रीगोरषनाथको दर्सनलाई गोर्षामा आउनुभयो र दर्सन भयापछि सलित भेट भयो र मैले भन्या. साम्राज्यू मकवानपुर पनि पुगि आजा. नेपाल पनि देषि आजा. हाम्राको मनसुवा पनि राषि आनां, कति कुराले मेरो काज फत्ये होला. अर्ति बक्सनुभया हुदो हो भनि मैले भन्दा मलाई पनि पच्चरात्रीमा द्रिष्टान्त भयो. हामीले देष्ता पाच पाण्डुवाको अवतार भया जस्तो लाग्दछ. कुरुक्षत्रको मेला नभै नेपाल फुट्नेछैन. लमजुन् भन्याको गरुड हो. गोर्षा भन्याको सरप हो. नेपाल भन्याको भ्यागुतो हो. अघी गरुडको आषा छल्नु. तब सर्पले भ्यागुतो षान पाउछ. मेरा साथमा चार जातका सिपाहि छन्. इन्मा कस्को सवार गऱ्या चाडो काज फत्य होला भनि सोद्धा के के जात छन् भनि सोधनुभयो र बाहुन् षस् मगर ठकुरि इनमा कस्को सवार गऱ्या चाडो काज फत्य होला भनि सोद्धा बाहुन्को सवार भन्याको बयेल हो. पातक् लाग्छ. ठकुरिको सवार भन्याको सिंघ हो. पछाडि दगा हुन्छ. मग्रको सवार भन्याको टागन् घोडा हो. ढिलो हुन्छ. षसको सवार भन्याको ताजि तुर्कि घोडा हो. षसको सवार गऱ्या चाडो होला भन्या जस्तो लाग्छ भनि अरु धेरै कुराको अर्ति दि जानुभयोथ्यो. उनै अर्ति लिजा र.

संस्कृतच्छाया

अथ मातुलो नीलकण्ठं पशुपतिं च द्रष्टुं देवघट्टमार्गेण गत्वा तौ देवौ दृष्ट्वा गोरक्षनाथं द्रष्टुं गोरखाम् आगच्छत् । गोरक्षनाथं दृष्टवतस् तस्य मया सह समागमो ऽभवत् । मातुल माकन्दपुरं गत्वा नेपालद्रोणिं च दृष्ट्वा परावृत्तो ऽस्मि , तौ देशौ जिगीषामि , येनोपायेन सफलो भवेयं भवान् मां तम् उपायम् उपदिशत्विति मातुलम् अवदम् । पाञ्चरात्रसम्प्रदायं मनसिकृत्येव दृष्टान्तं दर्शयन् मातुलो ऽभाषत । पञ्चपाण्डवाः पुनरप्यवतीर्णा इत्यस्माकं मनसि प्रतिभाति , कुरुक्षेत्रयुद्धवर्जं नेपालद्रोणी वश्या न स्यात् , लम्‌जुङो नाम गरुडः, गोरखा नाम सर्पः, नेपालद्रोणी नाम भेक इति प्रतिभाति , सर्पः पूर्वं गरुडं मोहयतुः पश्चाद् भेकं खादतु । मम राज्ये चतस्र आयुधीया जातयः सन्ति , बह्वीतां गतया कतमया शीघ्रं कार्यसिद्धिः स्याद् इति पृच्छति मयि ताः का

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ज्ञातय इति मातुलो माम् अपृच्छत् । ब्राह्मणप् ठकुरिः खसो मगर इति नाम ग्राहं जातीर् अकथयम् । मातुलोऽभाषत । ब्राह्मणो नाम गौः, गाम् आरोहन् पापभाग् भवति, ठकुरिर् नाम सिंहः, सिंहम् आरोहन् पश्चात् पराभवं प्राप्नोति, मगरो नाम टङ्कनाऽश्वः, टङ्कनाऽश्वम् आरोहन् मन्दायते, खसो नाम बली तुरुष्काऽश्वः, बलिनं तुरुष्काऽश्वम् आरोहन् द्रुतं स्वाऽभीष्टं स्थानं प्राप्नोतीति मम मनसि प्रतिभाति । इत्यादिकान् बहून् बिषयान् उपदिश्य मातुलोऽगच्छत् । अहं तान् उपदेशान् मनस्यधारयम् ।

पद्यमयी व्याख्या

किं कर्तव्यं, नयज्ञः सकरुणहृदयो दर्शयेत् को नु मार्गम्
इत्याकारे विचारे ज्वलयति हृदयं नाऽलभे शर्म गेहे ॥३५॥
सूनुर् गन्धर्वसेनाऽभिधधरणिपतेः पालपापालकस्य
मातृभ्राता मदीयो हिमसरसि कृताऽवस्थितिं नीलकण्ठम् ।
वाग्वत्यम्भः पुनानं पशुपतिमखिलं दुष्कृतं नाशयन्तं
द्रष्टुं स्वं मर्त्यदेहं सफलयितुमपि स्वाद् अगारात् प्रतस्थे ॥३६॥
कृष्णाया गण्डिकायास् तटमनुसरता देवघट्टं प्रपद्य
सप्तानां गण्डकीनां समुदितसलिले पुण्यदे तेन सस्ने ।
रम्यांस् तुङ्गान् महीध्रान् सुविमलपयसो निम्नगा भिन्नरूपं
ग्रामान् क्षेत्राणि मर्त्यान् अपि मुदितमना वीक्षमाणो ययौ सः ॥३७॥

भिन्नरूपम् नपुंसकम् अनपुंसकेनैकवच् चाऽस्याऽन्यतरस्याम् ।
पाणिनिः– १।२।६९

पूजां कुर्वन् सुराणां विदधदभिषवं पुण्यदास्वापगासु
तृप्तान् कुर्वन् द्विजादीन् नियममनुसरंस् तीर्थयात्रां स चक्रे ।
द्रष्टुं गोरक्षनाथं प्रणतभयहरं गोरखाम् आजगाम
सम्पूज्यैनं यतीशं मम भवनमसावागमत् स्निग्धचेताः ॥३८॥
बन्धुप्रीत्या विधाय स्वकुलसमुचितां सत्कृतिं मातुलस्य
तं पृच्छामि स्म मार्गं विविदिषुहृदयो राजधर्मोपदिष्टस् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

याते माकन्ददेशं मयि निजगृहिणीं गेहमानेतुकामे
सार्द्धं श्यालेन दैवाद् अविनयपटुना मे विरोधो ऽजनिष्ट ॥३९॥

श्यालेन=दिग्बन्धनसेनेन

नेपालद्रोणिदेशं प्रणिहितहृदयः संविलोक्या ऽ गतोऽस्मि,
देशावेतौ जिगीषोर् भवति मम कृते को वरीयान् उपायः ।
चिन्ताग्रस्तो ऽ स्मि, रात्रावपि सुखशयनं नो लभे, जाग्रतो मे
यामिन्यो यान्ति दीर्घा, उपदिशतु हितां पद्धतिं मातुलो माम् ॥४०॥
श्रुत्वा वाचं मदीयां प्रणिहितहृदयो मातुलो भाषते स्म,
सामान्यं मर्त्यरूपं यदुकुलजनुषो देवकीनन्दनस्य ।
दृष्टं सामान्यमर्त्यैः, स परमपुरुषो वर्तते योगिदृष्टौ,
तस्य भ्राता ऽ। ग्रजातो ऽ सितवसनधरो वर्ण्यते जीवरूपः ॥४१॥

तस्य=कृष्णस्य
अग्रजातो भ्राता= बलभद्रः

प्रद्युम्नं कृष्णपुत्रं वदति यतिजनो बुद्धितत्त्वस्वरूपं,
शौरेः पौत्रो ऽ निरुद्धो भवति यतिमते ऽ हङ्कृते रूपमाप्तः ।
व्याख्यैषा पाञ्चरात्री परिषदि विबुधैस् तन्यते ऽ ध्यात्मविद्भिर्,
अस्मद्दृष्टौ स्थ तद्वद् धृतनवजनुषः पाण्डवाः पञ्च यूयम् ॥४२॥
नेपालद्रोणिदेशे पृथुलशिखरिभिः सर्वतो वेष्टयमाने
संविष्टानां पुरीणां दृढतरपरिखावप्रशालैर् वृतानाम् ।
कर्तुं दुर्गोपलम्भं प्रभवति न रिपुस्, तेन तां जेतुकामैः
सङ्ग्रामो ऽ वश्यकार्यो न भवति न कुरुक्षेत्रयुद्धेन तुल्यः ॥४३॥

परिखा=दुर्गाद् बहिस् तत् परितः कृतं खातम्
वप्रम्=परिखायाउद्धृतमृत्तिकाकूटम्
शालः=प्राकारः

अन्योन्यं स्पर्द्धमानैर् धरणिपरिवृढैः स्वैस् त्रिभिर् भुज्यमानो
नेपालद्रोणिदेशो हतविधिरधुना भेकसाम्यं बिभर्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आस्ते तं कालकाङ्क्षी कवलयितुमना गोरखाः सर्परूपस्,
तं च ग्रासं विधित्सोर् गरुडसदृशता दृश्यते लम्जुङस्य ।।४४।।

तम्=गोरखादेशम्

मण्डूकं भोक्तुकामः पटुमतिरुरगो वैनतेयं विदध्याद्
आदौ सम्भ्रान्तचित्तं तदनु वशयितुं दर्दुरं प्रक्रमेत ।
प्राच्यां सीमां विलङ्घ्या ऽ हितनृपविषयं गन्तुकामेन वत्स
सीमायां पश्चिमायां स्थितरिपुनृपतिर् मोहनीयस् त्वया ऽऽ दौ ।।४५।।
तच् श्रुत्वा मातुलं स्वं पुनरवदमहं गोरखीयप्रजासु
शास्त्राऽभ्यासे रमन्ते निजकुलजगुणाज् जातयो ऽ मूश् चतस्रः ।
केषाञ्चिद् ब्राह्मणानाम् अपि नियतरुचिर् वर्तते शस्त्रवृत्तौ,
वर्तन्ते राजवंश्याष् ठकुरिपदयुता शस्त्रवृत्तिं दधानाः ।।४६।।
शस्त्रा।ऽजीवाः खसा।ऽख्या मगरकुलभवा आयुधीयाश् च सन्ति,
शीघ्रं सिद्धिं विधातुं प्रभवति कतमैतासु वह्यत्वमाप्ता ।
श्रुत्वा वाचं मदीयां विदितबहुनयः पूर्वसङ्ग्रामवार्ताः
स्मृत्वा सम्यग् विवृण्वन् भटजकुलगुणान् व्याकरोद् मातुलो मे ।।४७।।

वह्यं करणम् पाणिनिः- ३।१।१०२

भक्त्या निर्व्याजया वा स्वकुलहितविधेर् इच्छया पूजितायाः
सस्नेहं पालितायाः वहति सदृशतां गोस् तनूजेन विप्रः।
प्रत्यक्षं वा परोक्षं द्विजजनहनने भूमिपालस्य तस्मात्
पापीयान् ब्रह्महेति प्रसरति विपुलं दुर्यशो मर्त्यलोके ।।४८।।
राजन्याः स्मो ऽ नुकूले वयमपि च विधौ शासितुं स्मः समर्था
इत्याकारं विचारं मनसि ठकुरयः सस्मया धारयन्ति ।
तस्मात् ते सिंहशावा इव परवशतां स्वेच्छया न व्रजन्ति,
पश्चाद् उत्प्लुत्य हन्तुं सति तु परिभवे नैव ते सङ्कुचन्ति ।।४९।।
मन्दायन्ते स्वकृत्ये मगरकुलभवाष् टङ्कनाऽश्वैः समानाः,
शीघ्रायन्ते सवीर्याः खसकुलजनुषोऽश्वैस् तुरुष्कैः समानाः।
सैनापत्ये नियोज्यः खस इति, बहुधा ऽ।न्यच् च साधूपदिश्य
मच्चित्तं प्रीणयित्वा निजसदनमथो मातुलो गच्छति स्म ।।५०।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लम्जुङ्गेशेन सह सन्धिः

मूलपाठः

लम्जुंग्या राजा रिपुमर्दन् साहसित भेट गर्न भनि गया र चेपेघाटमा भेट भयो र घाहाथ(घ)रेसका बात गर्दा जौना कुराले घाहा बाधुला भंने जढ कुरो मेरा पेटमा थियो. सोहि जढ कुरो कालुपाडेले गऱ्यो र घाहा बलियो बस्यो र.

संस्कृतच्छाया

लम्जुङराजेन रिपुमर्दनशाहेन सह संगन्तुम् अहम् अगच्छम् । आवयोश् चम्पावत्यास् तीर्थे समागमो ऽभवत् । सन्धिविषयकायां वार्तायां प्रचलन्त्यां येन मुख्येन विषयेण पणबन्धं कुर्याम् इति मम मनस्यासीत् तम् एव मुख्यं विषयं कालुपांडेर् अकथयत् । दृढः सन्धिश् चा ऽभवत् ।

पद्यमयी व्याख्या

सुदृशो नहि गोरखावनावभवलं् लम्जुङ्देशशासकाः ।
रिपुमर्दनशाहभूपतिर् न बिभर्ति स्म ममा ऽनुकूलताम् ॥५१॥
मातृभ्रातुर् वचः स्वे मनसि निदधतो मे विचारे तदानीं
सन्धातव्याम् अवस्थाम् अभजत विषया ऽनन्तरो लम्जुङेशः ।
चम्पावत्याः स्रवन्त्यास् तटभुवि समगां लम्जुङेशेन साकं,
कालूपांडेः सभायां कुशलमतिरभूद् अस्मदीयो ऽधिवक्ता ॥५२॥
आसीत् सीमाविवादः सविधवसतिना कास्किना लम्जुङस्य,
सीम्नो हेतोर् युयुत्सुः प्रचुरभटगणं लम्जुङो वाञ्छति स्म ।
संगन्तुं तत्र युद्धे सह निजसुभटैर् लम्जुङेशस्य हेतोः
कृत्वा सत्यां प्रतिज्ञां निजहृदयकथां गोरखाः स्म ब्रवीति ॥५३॥
प्राच्यां शूलोद्भवाया अभिलषति महीं गोरखाः स्तोकमात्रां,
कार्यस्या ऽस्य प्रसिद्धौ लषति च सखितां गोरखा लम्जुङस्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तच् श्रुत्वा लम्जुङो ऽख्याद्, भजतु सफलतां गोरखा ईप्सीता ऽथ
यावत् सिन्धुप्रदेशं स जयतु च, यथाशक्ति कुर्मः सखित्वम् ॥५४॥
सन्धित्सोर् मानसे मे कृतपदमभवद् यादृशं वाक्यजातं,
कालूपाँडेः स्वबुद्धचा परिषदि वचसा तादृशा लम्जुङेशम् ।
कृत्वा तुष्टा ऽन्तरङ्गं दृढतरघटितं सन्धिपत्रं व्यधत्त,
पार्ष्णिग्राहोत्थशङ्का ऽभजदिव विलयं येन मे प्राग् यियासोः ॥५५॥

कालुपांडेर् मन्त्रित्वम्

मूलपाठः

मलाई आसर्जे लाग्यो र तर मलाई ता रिझायो. दुनिञा जस्‌वेषी राजि रहन्छन्. उसैलाई काजाई दिनु भन्ने सास्त्रमा पनि फहेको छ. दुनिञामा बुझिहेरं भनि बुझिहेर्दा दुनिञांबाट पनि कालुपाडेको चाहा रहेछ र कालुपाडे-लाई फजाई दिनुभया हामी दुनिञां दारमा छाहारि रहंदो हो भन्न्या सल्लाहा दिया र अब बाईसि चौबिसिले क्या भन्छन् भनि बुझ्नुहुदा बाईसि चौबिसिबाट पनि कालुपाडेकै चहा रहेछ र कालुपाडेलाई कजाजि भया घाहाघराईस् बलियो राषन्यैछ भन्ने सल्लाहा दिया. मेरा मनमा ता बिराजवषेतिलाइ फजाई दिन आटेको थियो. तर ज्याधा बुद्दी कालुपांडेकै ठहर्‍यो र कालुपांडेलाई कजाजि भयाको हो ·

संस्कृतच्छाया

अहं विस्मेरचेता अभवम् । कालुपांडेर् माम् अरञ्जयत् । परं प्रजाभ्यो यो रोचते स एव मन्त्री कार्यं इति शास्त्रवचो ऽपि वर्तते । अतः प्रजानां भावो ऽपि ज्ञातव्य इति प्रजानां भावे ज्ञायमाने कालुपांडेः प्रजाभ्यो ऽपि रोचत इति ज्ञातम् । कालुपांडेकाय भवान् मन्त्रितां ददयाच् चेद् वयं सुखिताः स्यामेति प्रजा अकथयन् । अतः परं कर्णालीनीरसिक्तां गण्डकीनीरसिक्तां च भूमिं प्रशासतां राज्ञां भावो ज्ञातव्य इति तेषां भावे ज्ञायमाने तेभ्यो ऽपि कालुपांडेर् एव रोचते स्म । कालुपांडेर् मन्त्री स्याच् चेत् सन्धिर् दृढः स्याद् इति ते ऽकथयन् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बिराजबखेती मन्त्री स्याद् इति मम मनसि भाव आसीत् । परं कालुपांडेर् बुद्धिर् महीयसी दृश्यते स्म । अतः कालुपांडेकाय मन्त्रिताम् अददाम् ।

पद्यमयी व्याख्या

कालूपाँडेः स्वबुद्धचा व्यधित मम मनो विस्मितं प्रीणितं च,
तस्मै मुख्या ऽधिकारं सचिवपदगतं दातुमिच्छा ऽभवद् मे ।
यो रोचेत प्रजाभ्यः सचिवपदगतं तं नृपालो विदध्याद्,
इत्युक्तिः शास्त्रजा तु व्यधित जनमनोबोधने कौतुकं मे ।।५६।।
व्यधित=अकरोत्
कालूपाँडेः सुखे नो ऽनुभवति सुखितां दुःखिताम् एति दुःखे,
तस्मिन् साचिव्यभाजि प्रवहतु नितरां नो गृहे सौख्यधारा ।
इत्याकारे विचारे प्रकृतिहृदयगे श्रोत्रयुग्मेन पीते
कर्णाली–गण्डकीस्थक्षितिपचयमनो बोद्धुमिच्छा ममा ऽभुत् ।।५७।।
कालुर् मैत्रः प्रकृत्या पटुतरधिषणो वर्तते दूरदर्शी,
मुख्यं मन्त्राऽधिकारं स भजतु, भवतु स्थायिनी मित्रता नः ।
कर्णाली–गण्डकीभ्याम् उपहृतसलिलाञ् शासतां भूमिभागान्
पाश्चात्त्यानां नृपाणाम् इति हृदयकथा मामकं कर्णमागात् ।।५८।।
सर्वथा ऽस्ति शुभभक्तिसमेतो भूपतौ मयि बिराजबखेती ।
मन्त्रितां स लभताम्, इति भावो मामकं हृदयमावसति स्म ।।५९।।
हित्वा पूर्वा ।ऽग्रहं स्वं बलवदकरवं योग्यतायाः परीक्षां,
कालूपाँडेः परीक्षाविधिषु विजयितां सर्वदा सेवते स्म ।
आत्मा ऽभीष्टं विहाय प्रकृतिजनमनो ऽभीष्टमाधातुकामः
कालुं स्वं मन्त्रिमुख्यं विधिवदकरवं राष्ट्रकल्याणहेतोः ।।६०।।
बलवत्=अतिशयम्

पाँडे–बस्न्यातसम्बन्धः

मूलपाठः

अब पाडे बस्न्यातको जुग बाधिदिछु . तेरि छोरि सिबराम

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बस्न्यात्को छोरो केहेर्सिंह बस्न्यात्लाई देउ भनि मागि बिहे पनि गरिदिनां र पाडे बस्न्यात्को जुग बाधि पाडेको ढाल् बस्न्यात्को तरवार गरि नेपालमा चढाइ गन्यायाको हो ॥

संस्कृतच्छाया

अथ पाँडे-वस्न्यातकुले थुन्ज इति शिवरामसिंहवस्न्यातस्य पुत्राय केहेरसिंहवस्न्याताय तव पुत्रीं देहीति कालुपाँडेकं नियुज्य वस्न्यातपाँडेकुलजयोर् वरवध्वोर् विवाहम् अहं स्वयम् अकारयम्। इति पाँडे-वस्न्यातकुले युक्त्वा पाँडेकुलस्य चर्मणा वस्यातकुलस्य खड्गेन च नेपालद्रोणीम् अभ्यद्रवम् ।

पद्यमयी व्याख्या

कालुस् तनूजाम् उपयामयोग्यां विचिन्त्य चिन्तां भजते स्म किञ्चित् ।
केहेरसिंहः शिवरामपुत्रो दारक्रियायोग्यदशाम् अलब्ध ॥६१॥
उक्तौ कन्याकुमारौ परिणयविधिना योजयित्वाऽहमादौ
पाँडेबस्न्यातवंशौ प्रथितमतिबलौ सख्यभाजावकार्षम् ।
पाँडेवंश्याः स्वबुद्ध्या निजजनपदजं साधु सम्पाद्य कार्यं
हृत्वा शत्रुप्रयोगान् व्यधिषत सुफलैर् अन्वितां बाह्यनीतिम् ॥६२॥
शूरा बस्न्यातवंश्याः प्रथितभटगुणान् आयुधीयान् विचित्य
सङ्ग्रामे तान् विनीय व्यधिषत सुबलां वाहिनीं गोरखीयाम् ।
नीत्या पाँडेऽन्वयानां रणकुशलतया शूरबस्न्यायितानां
नेपालद्रोणिसंस्थं त्रितयमपि पुरां जेतुमीशा अभूम ॥६३॥

सल्ल्यानकोटस्थाया देव्या उपासना

मूलपाठः

उप्रान्त ॥ रणजित् बस्न्यात् मानसिं रोकाहा बिरभद्र पाठक् इनलाई गौटान्को बिराई लिग्लीग्को आउ(ड)मा राखी मं पनि सल्ल्यान्कोटकि देवी साछ्यात् छन् भनि भन्छन्. म पनि सायेत गरि जान्छुं भनि बिबा गराया

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

र सायेत गरि म पनि गर्नु' र बारिमा थर्पु पऱ्यो र सल्ल्यानिको थरघर बराहां उमराउहरूसित सुध्याजा. माईको दर्सन् गर्नु हुंछ की भन्दा भित्र दर्सण पुजाहारि टहलुवालाई मात्रै भित्र दर्सन गर्नु हुन्छ. जो हुकुम् भन्या र ढोकामा ता हुन्छ कि भन्दा ढोकामा ता हुन्छ भन्या र साज बिह्यान ढोकासम्म जाई पाठपुजा जप् दर्सन् गर्थ्या र यक दिनका रातमा सोपना भयो र दुई हातमा दुई षड्ग लियाकी सात-आठ वर्षकी कन्न्या कुसुमे पछ्यौराको घुगूटि पारि मछेउ आइन् र मैले सोध्याजां . तिमि कस्की छोरि हौ भनि मैले भन्दा पुजाहारि रानाकि छोरि हुं भनिन् र उ दुवै षड्ग मेरा हातमा दिन् र आरसि प्रमानको लाल टल्बल् गर्थ्यो. षोकीलाबाट झिकी मेरा मुषसम्ममा ल्याई यो पनि निल् भनिन् र तम्रो मनकाम्छया पुऱ्याईदियाको छ म पनि केही माग्छु'. थपि जाउ भनि जसै दुई पाईला गैथिन्. उसै बेलामा मं पनि बिम्झ्यो र मानु जैसि कुलानन्द जैसि पुजाहारि रानालाई डाक्या र सुध्याजा. जैसिले पनि पुजाहारिले पनि ति माई हुन्. दर्सन पाउनुभएछ भने र उसै बेलामा धुप दिप घजा नैबेदे नित्यपुजालाई सात राग्गा सातै बोका थपि बोर्लांघाटको आम्दानी र घाटैछेउको टार माईलाई संकल्प गरिदिजा र उसै घरिको सायेत गरि

संस्कृतच्छाया

लिगलिगविषये गौटाङनाम्नि नवशोधिते भूभागे रचिते दुर्गे बस्न्यातोपनामकं रणजितं रोकाहोपनामकं मानसिंहं पाठकोपनामकं वीरभद्रं च न्ययोजयं सुमुहूर्ते व्यसर्जयं च । सल्ल्यानकोटस्था देवी प्रत्यक्षफलदेति प्रायोवादो वर्तते । अहम् अपि तां सेविष्य इति सुमूहूर्ते गृहाद् निरगच्छम् । तत्र प्राप्या ऽहम् उद्याने नवरचिते पर्णगृहे न्यवसम् । सल्ल्यानकोटस्थान् मौलान् अन्तपालं च देव्या मन्दिरस्या ऽन्तर् दर्शनाय पर्यपृच्छम् । मन्दिरस्याऽन्तः पूजकः शोवकश् चैव प्रवेष्टुम् अर्हतः, यद् आदिशति देव इति ते ऽब्रुवन् । द्वारप्रदेशपर्यन्तं गन्तुम् अहम् अपि अर्हामीति मयि पृच्छति ते ऽन्वमन्यन्त । प्रत्यहं सायं प्रातश् च देवीमन्दिरद्वारं गत्वा स्तोत्रपाठं पूजां जपं दर्शनं चा ऽकवरम् । कस्याञ्चन रात्री स्वप्ने हस्तयुग्मे खड्गयुग्मं दधती कौसुम्भं साऽवगुण्ठं वस्त्रं परिदधती सप्ता ऽष्टवर्षा काचन कन्या मया ऽदृष्यत ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बाले त्वं कस्य पुत्रीति मयि पृच्छति रानावंशजस्य पूजकस्याऽहं पुत्रीति सा माम् अकथयत्। सा स्वकीयं खड्गयुग्मं मह्यं मे हस्तयोर् अददात्। आदर्शवद् द्योतमानं किञ्चिद् रक्तं वस्तु वस्त्रच्छन्नात् स्वकुक्षेर् बहिः कृत्वा मम मुखम् उपानीय त्वम् एतद् निगिर, तव मनोरथो मया पूरितः, अहम् अपि किञ्चिद् याचे, किञ्चिद् वर्द्धयित्वा गच्छेति सा मां कथयित्वा यावद् अचलत् तावद् मम स्वप्नभङ्गोऽभवत्। ज्योतिर्विदौ भानु-कुञ्जानन्दौ रानावंश्यं देवपूजकं चाऽऽहूय पर्यपृच्छम्। सा देवी दिष्ट्या देवस्य दर्शनपथम् आगतेति तेऽब्रुवन्। धुप-दीप-ध्वज-नैवेद्यसमेताया नित्यपूजायास् तथा सप्तच्छागबलि-सप्तमहिषबलिसमेताया विशेषपूजायाश् च कृते बोर्लाङतीर्थं जातम् आतरं तत्तीर्थसमीपस्थम् असेतुबन्धं क्षेत्रं च सङ्कल्पपूर्वकं भगवत्यै तस्मिन् काले समार्पयम्। तस्मिन् काल एव सुमुहूर्ते ततः प्राचलं च।

पञ्चमयी व्याख्या

देव्याः सल्ल्यानकोटे विरचितवसतेर् भक्तकामप्रदाया
रामाऽऽद्यैः पूर्वभूपैर् निजकुलजनिभिः सिद्धये सेवितायाः।
श्रुत्वा श्रुत्वाऽवदानं परिचरितुमनास् ताम् अहं सिद्धिहेतोस्
तस्या देव्याः समीपं जिगमिषुरभवं भक्तिपूतान्तरात्मा ॥६४॥
सीमायां पश्चिमायां समुचितविधिना साधु गोपायितायां
सत्याम् एव प्रयाणं शतमखककुभि स्याच् शुभायेति मत्वा।
चम्पावत्याः स्रवन्त्यास् तटनिकटगते नूत्नकेदारदेशे
सीमायां पश्चिमायां लिगलिगविषये साधु दुर्गाणि कृत्वा ॥६५॥

गोपायितायाम् = रक्षितायाम्
शतमखककुभि = पूर्वस्याम्
केदारः = क्षेत्रम्

सीमात्राणं विधातुं प्रथितमतिबलाञ् शोधितान् दुर्गपांस् त्रीन्
पूर्वान् मत्वा समर्थाञ् शुभतरदिवसे प्रेषयामि स्म तत्र।
देवीं सल्ल्यानवासां परिचरितुमनाः सद्मुहूर्ते स्वगेहात्
प्रायां, देव्याः समीपाम् उपवनरचितां पर्णशालां श्रये स्म ॥६६॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मौला: सल्ल्यानभाजो बलपतिरपि मे स्वागतं कर्तु कामा
आयान्, प्रावोचमम्बापरिचरणविधौ लालसां तान् स्वकीयाम् ।
भक्त्या पादौ भवान्या अवनतशिरसा स्वेन संपीड्य नन्तुं
वाञ्छां चित्ते लसन्तीं कथयति मयि ते सज्जना अब्रुवन् माम् ॥६७॥

बलपतिः = सेनापतिः

देव्याः स्पर्शं विधातुं प्रभवति नियतः पूजकः शोधकश् च,
तां द्रष्टुं द्वारदेशात् प्रभवति मनुजो भक्तिपूताऽन्तरात्मा ।
राजन्नेषा व्यवस्था गुरुजनमहिता कालिकी राजते ऽत्र,
सत्या विज्ञप्तिरेषा, समुचितकरणे देव एवं प्रमाणम् ॥६८॥

कालिकी = अ.ष्टो दीर्घः कालो ऽस्याः

सायं प्रातश् च नित्यं त्रिभुवनजननीद्वारमाप्त्वा नमंस् तां
तस्याः स्तोत्रस्य पाठं जपमपि विदधद् यापयन् कालमासम् ।
पर्णा ऽगारे स्वकीये निशि शयनसुखं सेवमानस्य जातु
स्वप्ने सप्ता ऽष्टवर्षा मम नयनपथं बालिका काचना ऽगात् ॥६९॥
बिभ्राणा खड्गयुग्मं निजकरयुगले संवसानोत्तरीयं
कौसुम्भं सा ऽवगुण्ठं मम निकटमियं कन्यका ऽऽगच्छति स्म ।
बाले त्वं कस्य पुत्री, मम वचनमिदं सन्निशम्या ऽब्रवीत् सा,
रानावंश्यस्य शाहा ऽन्वयधरणिपते देवलस्या ।ऽत्मजा ऽ।हम् ॥७०॥
मह्यं सा कन्यका ऽ।दाद् निजमसियुगलं हस्तयुग्मे मदीये,
वस्त्रच्छन्नात् स्वकुक्षेर् बहिरकुरुत सा ऽऽदर्शवद् द्योतमानम् ।
शोणं कञ्चित् पदार्थं, मम वदनमुपानीय तं सा न्यगादीद्,
राजन्नेतं पदार्थं निगिर, मम गिरा पूर्णकामस् त्वमेधि ॥७१॥

एधि=भव

याचे मह्यं च किञ्चित् समुचितविधिना वर्धयित्वा व्रज त्वम्,
इत्युक्त्वा सा प्रयाणं व्यधित च सपदि स्वप्नभङ्गो ममा ऽभूत् ।
आहूय स्वे निवासे निजगणकयुगं देवतापूजकं च
वृत्तान्तं स्वप्नदृष्टं न्यगदमथ फलं तद्भवं पर्यपृच्छम् ॥७२॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तेऽवोचन् सैव देवी त्रिभुवनजननी वाञ्छितार्थप्रदात्री
दिष्ट्या देव त्वदीयं नयनपथमगात्, वर्धसे श्रेयसेति ।
जाग्रद्दीपा सुधूपा ध्वज–बलिलसिता गन्धयुक्ता सुभोज्या
शास्त्रोक्ता पूरिता स्यात् त्रिभुवनजननीमन्दिरे नित्यपूजा ।।७३।।

अगात्=अगमत्

देव्याः पूजा विशेषा विलसतु बलिभिः सैरिभैः सप्त७सङ्ख्यैस्,
तत्सङ्ख्यैः सा सपर्या छगलकबलिभिश् चाऽस्तु संपूरितेति ।
वृद्धाया गण्डिकायास् तटनिकटगतां मेदिनीम् आतरं च
जातं बोर्लाङ्तीर्थात् सपदि सहविधि स्पर्शयामि स्म देव्यै ।।७४।।

सैरिभ.=महिषः

छगलकः = छागः

आतरः = तरपण्यम्

बोर्लाङ्तीर्थात्= बोर्लाङ्घट्टात्

स्पर्शयामि स्म = अददाम्

सिमलचहुरे निवासः

मूलपाठः

रातदिन गरि सरासरी आया र सिमल्चौर चौतारामा थर्पु हालि बस्याको थीजा. दावा भन्या नुहाकोटको बहाना भन्या षिच्यात्को कुलो काटि षेत बिराउनाको गरि राष्याथ्या. बेत्रावतिका बेनि इन्द्रायेनिका थानमा डुङ्गा तरि जप पाठलाई जांथ्या. ध्यान भन्या सल्ल्यान्कोट्कि देवीको र ईन्द्रायनि भैरवीको गर्थ्यां.

संस्कृतच्छाया

रात्रिन्दिवं प्रचलन् सिमलचहुरं प्राप्नवम् । तत्र कस्याश्चन वेद्यां पर्णशालां विरचय्य न्यवसम् । नुवाकोटं जेतुकामः खिञ्च्याते सेतुबन्धं विरचय्य बन्ध्यां भूमिं कृषियोग्यतां निनीषुर् अस्मीति व्याजम् अकरवम् । त्रिशूलीवेत्रा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नद्यो: संभेदे वसन्त्या इन्द्राण्याः प्रासादम् उडुपेन नदीं तीर्त्वा गत्वा जपं स्तोत्रपाठं पूजां चा ऽकरवम् । सल्ल्यानकोटस्थाया देव्या इन्द्राण्या भैरव्याश् च ध्यानम् अकरवम् ।

पञ्चमयी व्याख्या

तत्काले सद्मुहूर्ते प्रचलितचरणो वेगदीर्घीकृता ऽङ्गः
प्राचीप्रक्षिप्तचक्षुः सिमलचहुरजं पर्णसद्मा ऽहसापम् ।
पूर्वेषां नो जिगीषा ऽलभत सफलतां नो नुवाकोटदुर्गं,
तां पूर्णां कर्तुकामः सिमलचहुरजे पर्णगेहे न्यवात्सम् ।।७५।।
खिञ्च्याते सेतुबन्धं विरचयितुमथो सेतुना तेन वन्ध्यं
भूखण्डं क्षेत्ररूपे विपरिणमयितुं वासमत्रा ऽचरामि ।
व्याजेना ऽनेन मल्लक्षितिपतिमनुजान् मोहयन्, साधनानि
चिन्वन्, रन्ध्रं विचिन्वन् रिपुजनपदजं, यापयास्मि स्म कालम् ।।७६।।
ह्लादिन्या वेत्रवत्या सह मिलति धुनी यत्र शूलोद्भवा ऽऽख्या,
तस्मिन् स्थाने वसन्तीं शतमखदयितां द्रष्टुकामः प्लवेन ।
गत्वा कुर्वं स्म पाठं जपमथ सवृतिर् भावयामि स्म भक्त्या
देवीं सल्ल्यानवासां शतमखदयितां भैरवीं च स्वचित्ते ।।७७।।

ह्लादिन्या = नद्या
धुनी = नदी
प्लवेन = उडुपेन
शतमखदयिताम् = इन्द्राणीम्

जयन्तराना:

मूलपाठः

माहामण्डल भनेको नुहाकोटको सवता रहेछ. माहामंण्डलमा व्यामि राना थीयो. तं हाम्रा भरको व्यामि होस्. माहामंण्डल छोडिदे भछेउ आईज भनी पठावा र हुना ता मं हजुरैको हुं. तर जयप्रगास मल्लको नुन् पाईहाल्या. मरिमेटम्याछु" भनि हाक पारि पठायो र

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

नुवाकोटस्य प्रतिद्वन्द्वितां महामण्डलं बिभर्ति। महामण्डले जयन्तराना आसीत्। त्वम् अस्माकं पुरातनो जनोऽसि, महामण्डलं विहाय मम सकाशम् आगच्छेति दूतमुखेन तम् अकथयम्। राजन् भवत एव सेवकोऽहम् अस्मि, परम् इदानीं जयप्रकाशमल्लेन द[ ]ां वृत्तिं भुञ्जे, भर्तृपिण्डस्य हेतोर्, यथाशक्ति योत्स्य इति जयन्त आह्वयत।

पद्यमयी व्याख्या

नद्याः शूलोद्भवाया वरुणककुभि मे पैतृकं राज्यमासीत्,
तस्या नद्याः समीपो मघवदिशि नुवाकोट आस्ते महीध्रः।
अत्र प्रांशुः समा भूर् अध्रिशिखरि महामण्डलाऽऽख्यां बिभर्ति,
पाश्चात्त्यं सीमदुर्गं धरणिपरिवृढैर् यत्र मल्लैर् व्यधायि ॥७८॥

वरुणककुभि = पश्चिमायाम्
मघवदिशि = पूर्वस्याम्
अध्रिशिखरि = पर्वते

तस्मिन् सीमान्तदुर्गे कृतवसतिरभूद् दुर्गपालस्वरूपस्
तस्मिन् काले जयन्तो मगरकुलजनिः ख्यातरानोपनामा।
आस्माकीनो ऽसि दैवात् परनृपतिमगा नो महान् दोष एष
आगच्छ स्वीयदेशं समुचितभरणं मत्प्रसादाल् लभस्व ॥७९॥
सन्देशे ऽस्मिन् मदीये श्रुतिविषयगते दृप्तचेता जयन्तः
सन्देशं प्राहिणोत् त्वं नृपवर भवतः सेवको ऽस्मीति सत्यम्।
युष्मत्पादाऽब्जसेवा सहधृति मयका ऽकारि यावद्मनीषं,
तस्यां ना ऽसीद् विवेको, निजगृहमजहां वृत्तिविच्छेदमाप्त्वा ॥८०॥
मल्ला ऽन्वयः कान्तिपुरा ऽवनीशो जयप्रकाशो मम वृत्तिदो ऽस्ति।
तस्यैव हेतोः समरा ऽनले स्वं होतुं शरीरं नहि सङ्कुचामि ॥८१॥
एतच् श्रुत्वा जयन्तप्रतिवचनमहं चिन्तयामि स्म चित्ते,
वृत्तिच्छेदे स्वदेशे सति रिपुसन्निधं प्राप्य तस्यैव हेतोः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्वं देशं हन्तुकामा अपि धरणितले दुर्जना: सम्भवन्ति,
ते दण्डया: क्रूरदण्डैस् तदनुकृतिपरा येन ना ऽन्ये भवेयु: ।।८२।।

दण्डयात्रामुहूर्तः

मूलपाठः

येक दिन कचहरिमा बस्याको थिञां. तान्रा लागेछ र तान्रैमा ता ईन्द्रायनिका थानमा बस्याको रहेछुं. आजका साता दिनमा ठुलो सायेत छ. तेसै दिनको सायतले नुहाकोट साध्ये हुन्याछ भन्याको सुन्या र पात्र हेरन जैसि भन्या र पात्रो हेऱ्या र आजका साता दिन बिहाउडो सनिश्चरवार ठुलो सायेत रहेछ भनि बिन्ति गऱ्या र

संस्कृतच्छाया

कस्मिंश्चिद् दिवसे सभायाम् आसम् । तन्द्रा मां वशीचकार । तन्द्रायाम् अहम् इन्द्राण्या मन्दिरे ऽभवम् । अस्माद् दिवसाद् अष्टमे दिवसे शुभो मुहूर्तो भविता । तस्मिन् मुहूर्ते नुवाकोटदुर्गभङ्गो भवितेति ध्वनिर् मम कर्णयोर् अपतत् । दैवज्ञ पञ्चाङ्गपत्रं पश्येति मया निर्दिष्टो दैवज्ञः पञ्चाङ्गपत्रं विलोक्या ऽस्माद् दिवसाद् अष्टमे दिवसे सूर्योदये शनिवासरे समुदयभाने शुभो मुहूर्तो लब्ध इति मां व्यज्ञापयत् ।

पद्यमयी व्याख्या

कस्मिंश्चिद् वासरे ऽहं परिषदि विविधं कार्यजातं विवृण्वन्-
नासं, चित्ते मदीये समरविषयका: कल्पना जाग्रति स्म ।
तन्द्रा चक्रे तदा मां स्ववशमुपगतं, नेत्रयुग्मं मिमील,
प्रासादे शक्रपत्न्या विरचितवसतिं मां प्रमीला चकार ।।८३।।
भावी घस्रे ऽष्टमे ऽत: प्रचुरगुणयुतो दण्डयात्रामुहूर्तो,
यायी तस्मिन् मुहूर्ते वशयति न पुरा नो नुवाकोटदुर्गम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इत्याकारे ध्वनौ मे श्रवसि निपतिते निर्गतायां च तन्द्रयां
दैवज्ञं दण्डयात्रोचितदिनगणने चोदयामि स्म सद्यः ।।८४।।
वशयति न पुरा नो=निश्चयरूपेण जेता
वारे शुक्राऽभिधाने ऽपसरति दिवसे मन्दनाम्न्युज्जिहाने
व्योम्नि प्रक्षाल्यमाने ऽरुणकरनिकरैर् अष्टमे वासरेऽतः ।
लब्धो दोषैर् विहीनः प्रचुरगुणयुतो दण्डयात्रामुहूर्तो
राजन् युद्धे लभेथा विजयमिति वचो दैवविद् भाषते स्म ।।८५।।
मन्दनाम्नि= शनैश्चरनामके

नुवाकोटदुर्गोपलम्भः

मूलपाठः

उहि साहेतमा महामण्डलमा उक्लेउ र तरवार पऱ्यो र हाम्रा नुन्का सेषले झुकाईदिने पंथ बाह्रौं वर्षमा मेरा भाई दलमर्दन् साहले जेठि तरवार रानाको थापलामा हाल्यो र नुहाकोट साधे गरि बढाई गरेउ र

संस्कृतच्छाया

तस्मिन्नेव मुहूर्ते महामण्डलम् आरोहाम । सङ्ग्रामो ऽभवत् । पन्थो भर्तृपिण्डस्य हेतोः शत्रून् अकम्पयत् । द्वादशवर्षो ममाऽनुजो दलमर्दनशाहः सेनापतिग्राह्यं खड्गं रानाः शिरसि न्यपातयत् । नुवाकोटदुर्गोपलम्भो ऽभवत् । वयम् उत्सवम् अकुर्महि ।

पद्यमयी व्याख्या

कालें मौहूर्तिकेन स्वगणितविधिना निश्चिते शस्त्रहस्ता
आरोहामः स्म धृत्या वयमुपरि महामण्डलं जेतुकामाः ।
रानाका दुर्गरक्षां रचयितुमभवन् सैनिकाः शस्त्रहस्ताः,
सङ्ग्रामं कीर्तिकामा गतभयमुभये सैनिकाः कुर्वते स्म ।।८६।।
राना ग्रामणीः प्रधानो मनुष्य एषां ते रानाकाः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दलमर्दननामकस् तदानीम् अनुजो मे भुजचन्द्र १२ वर्ष आसीत् ।
नहि वर्महरस् तदा स आसीद्, निजकृत्या त्वभवत् स शौर्यचुञ्चुः ।।८७।।

वर्महरः=कवचधारणा ऽर्हवयस्कः

शौर्यचुञ्चुः= शूरतया प्रसिद्धः

भर्तुः पिण्डस्य हेतोः स्वतनुमपि रणे मन्यमानस् तृणाय
योद्धा मे पन्थवंश्यः सकलरिपुमनो ऽकम्पयद् विक्रमेण ।
मद्भ्राता द्वादशा ऽब्दो ऽपि स रणपटुतां दर्शयन्नग्रगामी
रानावंश्यं जयन्ता । ऽत्मजमकृत शिरोवर्जितं खड्गपाणिः ।।८८।।

सङ्ग्रामे मां जयश्रीर् अवृणुत, च नुवाकोटदुर्गोपलम्भे
संपन्ने मामकानां जयमनुभवताम् उत्सवो ऽभूद् महीयान् ।
भूयो भूयो ऽपि कान्तिक्षितिपतिरकरोद् दुर्गमेतत् स्वकीयं
कर्तुं यत्नं महान्तं, व्यदधत सुभटा मे तु तं भग्नकामम् ।।८९।।

ककन्यां शिवपुर्यां च गुल्मौ

मूलपाठः

ककनि र सिवपुरिमा ठाना हालि मुर्चा लाइ राषथेउ.

संस्कृतच्छाया

ककनीनामके शिवपुरीनामके च गिरीशिरसि गुल्मौ विरच्य नेपालद्रोणीम् मरुन्धि ।

पद्यमयी व्याख्या

षाड्गुण्यं सेवमानः शतमखककुभं मन्दमन्दं स्म यामि,
गुल्मद्वन्द्वं मया स्वं ककनि-शिवपुरीशृङ्गयुग्मे व्यधायि ।
नेपालद्रोणिदेशं वृत्तमिव शनकैर् गौल्मिका मे व्यतन्वन्,
भूपाला मल्लवंश्याः प्रतिदिनमभवन् क्षीयमाणप्रतापाः ।।९०।।

शतमुखककुभम्=प्राचीम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परशुरामथापा:

मूलपाठ :

मलाई प्रसुराम थापाले नेपाल हान्न आउ भनी हात दिई राख्याथ्यो. आफ्ना भाईलाई लाजबिसि पुऱ्याउनु. बाईसि चौबिसि उठाई पछडी हान्नु भनि पठायछ र मैले पाहा पाजा र कहा पुग्याको छ भनि सुध्याजा र पोषराको हटियामा डेरा गरि बस्याको छ भनि सुन्या र तेसलाई बैठाई आउन को सकौला भनि सल्लाहा गर्दा कसैले पनि ठहराउन सकेन र मैले भन्या. झागल गुरुं सक्ला भनि डाकी अह्राई मेरा कंमरको कोतापान् दियां र गयो र पुगि गाईनेको भेष गरि हातमा बल्छीको टागो लि काषिमा सारंगी च्यापि २।४ घानिको सहर लैगी अरु उस्का लस्कररहरु भात षान्या बषत्मा अवसर हेरि बैठाई आयो र

संस्कृतच्छाया

थापावंश्य: परशुरामो नेपालद्रोणीम् अभिषेणयितुं माम् उदसाहयत्। कर्णालीजलसिक्तां गण्डकीजलसिक्तां च भूमिं शासतः पाश्चात्यान् भूपालान् अर्थसाहाय्येन स्वाऽनुकूलिकान् कृत्वा तान् मम पार्ष्णिं ग्रहीतुम् उत्साहयितुं परशुराम: स्वाऽनुजं गूढं प्रेषयामास। एतद् अहम् अशृणवम्। परशुरामस्याऽनुज: कुत्र प्राप्त इति जिज्ञासमानोऽहं पोखराप्रदेशे विपणौ स इदानीं वसतीत्यशृणवम्। तं निहत्य प्रत्यागन्तु क: शक्नुयाद् इति मन्त्रे कृते कोऽपि निर्णेतुं समर्थो नाऽभवत्। गुरुङवंश्यो झागल एतत् कर्तुं शक्नुयाद् इति तम् आहूय तस्मिन् कार्ये न्ययुङ्क्ष्व। सशस्त्रं निजकटिबन्धं तस्मा अददाम्। सोऽगच्छत्। गायनवेषं दधान: करेण बडिशं गृह्णन् कक्षेण कण्डोलवीणां दधानो झागल: परशुरामाऽनुजस्य समीपं प्राप्य तस्मै स्थूलं मत्स्यम् उपनिन्ये। परशुरामाऽनुजस्य जनेषु भक्तं भुञ्जानेषु लब्धाऽवसरो झागल: तं व्यापाद्याऽगच्छत्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

थापा ऽह्व: पशुं रामो नयसमरपटुर् मल्लमौलेषु कश्चिद्
माम् एत्या ऽब्रूत राजन् व्रजतु सफलतां तावकीना जिगीषा ।
नेपालद्रोणिसंस्था त्रिपुरविलसिता त्वां वृणीतां नृपश्रीस्,
त्वत्सेवां कर्तु मद्धा विवृतपरिकरं सेवकं माम् अवेहि ।।९१।।
इत्युक्त्वा मामकीनान् कतिचन कठिनान् राजनीतिप्रयोगान्
कुर्वन् सिद्धान् स थापाः प्रकटितविनयो मां व्यधाद् मुग्धचित्तम् ।
कर्णालीगण्डकीभ्याम् उपहृतसलिलाञ् शासतो भूमिभागान्
पाश्चात्त्यान् भूमिपालान् द्रविणवितरणैर् आत्मपक्षे विधाय ।।९२।।
तत्संयुक्तध्वजिन्या रहसि घटितया गोरखां पार्ष्णिभागाद्
हन्तुं मन्त्रं च कोषं धरणिपरिवृढात् स्वा ऽधिपात् प्राप्य मल्लात् ।
थापाधूर्तो ऽनुजातं निजमपरदिशं प्रेषयामास गूढं,
थापाः प्रत्यक्षमेत्य प्रतिदिनमकरोद् मे हितं प्रीणनं च ।।९३।।

अपरदिशम्=पश्चिमाम्

प्रत्यक्षमेत्य=समीपम् आगत्य

पशुंरामचरितं शनैः शनैर् वीक्षितं प्रणिधिचक्षुषा मया ।
प्रस्थितस् तदनुजो ऽस्ति साम्प्रतं पोखरास्थविपणाविति श्रुतम् ।।९४।।
धूर्तस् थापा ऽनुजन्मा सपदि यमपुरीं प्रापणीयो ऽन्यथा ऽस्मद्-
हानिं कुर्याद् महिष्ठाम् अयमिति हृदये निर्णयो मे ऽजनिष्ट ।
नीत्वा थापा ऽनुजातं पितृपतिसदनं को जनो मामकीनः
प्रत्यागच्छेत् स्वकीयं सदनमिति जनान् स्वान् अहं पर्यपृच्छम् ।।९५।।
श्रुत्वा वाचं मदीयां हृदयगतकथाः पारिषद्याः समस्ता
अन्योन्यं दृष्टवक्त्राः प्रतिवचनविधौ नो समर्था अभूवन् ।
साकं व्याघ्रेण योद्धुं द्विपपतिमुरगं वा प्रसह्य ग्रहीतुं
केचित् तीक्ष्णा मनुष्या धननिचयकृते जातु नो सङ्कुचन्ति ।।९६।।
आस्ते तीक्ष्णस्वभावो गुरुङकुलजनिर् झागलो ऽत्र प्रसिद्ध,
एतत् कार्यं स कुर्याद् इति मम हृदये ऽभूद् विचारः प्ररूढः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आहूयैनं विविक्ते गुरुङमचकथं सा ऽदरं साघनीयं,
मद्वाक्ये कर्णमाप्ते विकसितवदनो ऽभून् स उत्साहशाली ॥९७॥
स्थेयान् उत्साह आस्तां मनसि दृढतरे भागलस्येति तस्मै
दत्त्वा बन्ध सशस्त्रं निजकटिविधृतं सा ऽदरं तं व्यसृक्षि ।
कक्षे कण्डोलवीणां दधदभिनयविद् गायना ऽकल्पशाली
स्थूलं मत्स्यं स गृह्णन् करधृतबडिशः प्राप थापा ऽनुजातन् ॥९८॥

आकल्पः = वेषः

थापाभ्राता कनीयान् श्रुतिमधुररवं गीतमाकर्ण्य मुग्धो
लब्ध्वा मत्स्योपहारं सविधवसतितां स्वां ददौ गायनाय ।
कुर्वन् सेवां यथा ऽऽज्ञं विदधदभिनयं श्रोत्ररम्यं च गीतं
गायन् थापा ऽनुजातं गुरुङकुलजनी रञ्जयामास सम्यक् ॥९९॥
आसीत् थापा ऽनुजाताद् अपि चतुरतरो भागलो धूर्ततायां,
थापावर्ग्येषु सर्वेष्वपि नियतिवशाद् भोजनव्यापृतेषु ।
लब्ध्वा थापा ऽनुजन्मा रहसि यमपुरं भागलेन प्रजिघ्ये
धृत्वा नेपथ्यमन्यद् विकसितवदनो भागलो माम् उपागात् ॥१००॥

प्रजिघ्ये = प्रेषितः

नेपालद्रोणीस्थपुरत्रयदुर्गोपलम्भः

मूलपाठः

पछाडी युद्ध गरि नेपाल षोल्याई पुरुब पश्चिमका दुनिञा हात गरि नेपाल लियाथ्या ॥

संस्कृतच्छाया

पार्ष्णि शोधयित्वा नेपाद्रोणीगामिनो मार्गान् स्ववशीकृत्य प्राच्याः प्रतीच्याश्च प्रजा आनुकूलिकीः कृत्वा नेपालद्रोणीम् अजयन् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पद्यमयी व्याख्या

अस्मान् हन्तुं प्रसक्तान् घटितबहुबलान् पार्ष्णिमादातुकामाञ्
शोधं शोधं सपत्नान् अकरवमफलाञ् शात्रवाणां प्रयोगान् ।
मन्दं मन्दं प्रसर्पञ् शतमखककुभं मल्लभूपालराज्यं
गन्तॄञ्छत्रून् मार्गान् निरुन्धन् घटितदृढबलान् भूरिगुल्मान् अकुर्वि ।।१०१।।

पार्ष्णिम् = सैन्यपृष्ठम्
सपत्नान् = शत्रून्
शात्रवाणाम् = शत्रूणाम्
शतमखककुभम् = पूर्वां दिशम्
भूरिगुल्मान् अकुर्वि = बहून् मार्गनिरोधकसैनिकनिवेशान् अस्थापयम्

मा भूत् पीडा प्रजानाम् इति नयविदितं राजमार्गं यियासौ
षाड्गुण्यं सेवमाने मयि तुहिनगिरिं मे यशो व्यश्नुते स्म ।
लोकाः प्राच्याः प्रतीच्या अपि निजमनसा मे ऽभवन् सिद्धिकामा,
भूपाला मल्लवंश्या अजनिषत ततो राज्यहीनास् त्रयो ऽपि ।।१०२।।

यियासौ = जिगमिषौ

साम्राज्यद्वयमध्यवर्ती लघुतरो देशः

मूलपाठः

उप्रान्त ।। यो राजे दुई ढुंगाको तरुल जस्तो रहेछ,

संस्कृतच्छाया

अथ नेपालराज्यम् इदं पाषाणद्वया ऽन्तरालोद्भवेन दीर्घकन्देन सदृशं प्रतिभाति ।

पद्यमयी व्याख्या

आस्ते नेपालदेशो भरतवसुमती–चीनयोर् मध्यवर्ती,
स्तः साम्राज्ये उभे ते प्रथितबहुबले विस्तृते विश्रुते च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

साम्राज्यद्वन्द्वसीमायुगमपि वपुषा गाहमानो निजेन
नेपालः स्वल्पदेहो ऽप्यधिधरणि चिरात् संस्थितिं स्वां बिभर्ति ।।१०३।।

अधिधरणि = पृथिव्याम्

ते साम्राज्ये उभे च प्रणिहितमनसी दत्तनेत्रे सदैव
कार्ये नैपालके स्तो निजहितविषये स्पर्धमाने मिथश् च ।
साम्राज्यद्वन्द्वनीत्योर् अपि निजनयने प्रयत्नतः स्वकीये
सामर्थ्ये तिष्ठमाना वयमपि सततं जागरूका असाम ।।१०४।।

सामर्थ्ये तिष्ठमानाः स्थेया ऽर्थं आत्मनेपदम्

चीनचक्रवर्तिना सह सम्बन्धः

मूलपाठः

चीनबादसाहसित ठुलो घाहा राष्नु.

संस्कृतच्छाया

चीनचक्रवर्तिना सह सुश्लिष्टः सन्धिर् विधेयः ।

पद्यमयी व्याख्या

नेपालाद् उत्तरस्यां दिशि विपुलतरो वर्तते चीनदेशस्,
तं मञ्चूवंशजातः पृथुतरमहिमा शास्ति राजा ऽधिराजः ।
मञ्चूवंश्यस्य वश्या धरणिपतिपतेः सन्ति देशाः प्रभूता,
आस्ते चीना ऽधिराजः ककुभि धनपतेश् चक्रवर्ती प्रसिद्धः ।।१०५।।

धरणिपतिपतेः = महाराजा ऽधिराजस्य

धनपतेः ककुभि = उत्तरस्याम्

चीनेशाः सार्वभौमा बहुतिथसमयाद् एव नेपालपाश् च
काले काले स्वदूतैर् विदितपरिचया आसते ऽन्योन्यमेव ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अत्यन्तं दूरगत्वाद् विषमपथतया कष्टदत्वाद् गमस्य
सम्बन्धस् तु प्रजानां भवति तनुतरश् चीन–नेपालजानाम् ।।१०६।।

गमस्य = यात्रायाः

प्राकारा ऽऽकार आस्ते तुहिनवृततनुः शैलराजा ऽधिराजस्,
तस्योदीच्यं विभागं श्रयति जनपदो भोटनाम्ना प्रसिद्धः ।
याम्यं भागं हिमाऽद्रेः श्रयति जनपदः ख्यातनेपालनामा,
वर्तेते संनिकृष्टौ श्रिततुहिनगिरी भोट–नेपालदेशौ ।।१०७।।

तुहिनवृततनुः शैलराजा ऽधिराजः = हिमालयः

भोटं देशे कुलीना धरणिपरिवृढा ना ऽऽसते, किन्तु तस्मिन्
देशे लामा ऽभिधाना विदधति नृपतां भिक्षुवेषा मठेशाः ।
याते पूर्वे मठेशे सुरपुरमपरो भिक्षुराप्नोति पीठं,
वेधस् तस्या ऽभिषक्तो भवति यतिपतेश् चीनपाला ऽनुमत्या ।।१०८।।

धरणिपरिवृढाः = राजानः

भोटं स्वैरं प्रशास्ति प्रतनुजवनिका ऽन्तर्हितश् चीनसम्राट्,
सम्बन्धा भोटनिष्ठा विविधविषयकाः सन्ति नैपालकानाम् ।
सम्बन्धी भोट आस्ते, तदधिपतिपतिर् वर्तते चीननाथस्,
तस्माद् दूरो ऽपि सम्राट् स भवति निकटो दर्शने त्वस्मदीये ।।१०९।।

प्रतनुजवनिका ऽन्तर्हितः = सूक्ष्मतरवस्त्रछन्नः
नैपालकानाम् = नेपालदेशजानाम्
तदधिपतिपतिः = भोटदेशस्वामिनो ऽपि स्वामी

आस्माकाः सार्थवाहा बहुतिथसमयाद् भूरिपण्या व्रजन्ति
भोटं, तस्मिन् निषद्या अधिपुरि बहवः सन्ति नैपालकानाम् ।
भोटस्था अस्मदीयाः क्वचन नहि जनाः कष्टभाजो भवेयुर्
इत्यर्थश् चिन्तनीयः सततमवहितैर् अस्ति नेपालपालैः ।।११०।।

निषद्याः = आपणाः
अधिपुरि = नगर्याम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्माकं बाह्यनीतिः स्पृशति जनपदं भोटमस्यैव हेतोः,
स्वच्छन्दा भोटनीतिर् नहि चलति, परं सा ऽ। स्ति चीनस्य वश्या ।
अत्यन्तं विप्रकृष्टे प्रकृतिनियमतश् चीन–नेपालनीती
जायेते पृक्तदृष्टी विदितपरिचये भोटदेशं प्रपद्य ॥१११॥

अत्यन्तं विप्रकृष्टे = दूरतरे
पृक्तदृष्टी = संयुक्तदर्शने

आस्ते चीना ऽ धिराजः प्रथितबहुबलो ऽ त्यन्तविस्तीर्णराज्यः,
सम्राजा तेन साकं भवति सुघटितः श्रेयसे सन्धिरेव ।
भोटे नैपालकानां भवतु हितमथो सौम्यसीमासुरक्षा
नेपालस्या ऽ स्तु चेति प्रणिहितहृदयाश् चीनमैत्रीं विधत्त ॥११२॥

सौम्यसीमासुरक्षा = उत्तरसीमासुरक्षा
विधत्त = कुरुत

आङ्ग्लैः साकं सम्बन्धः

मूलपाठः

दषिनको समुन्द्रका बादसहासित घाहा ता राष्नु. तर त्यो महाचतुर छ. हिन्दुस्थाना दबाई राषेछ. सरजिमीमा परिरहेछ. हिंदुस्थाना जाश्यो भन्या कठिन् पर्ला भनि विरला षोजन आउन्याछ. संधीसर्पन् हेरि गडि तुल्याई राष्नु र रस्ता रस्तामा भाजा हालि राष्नु र यक दिन त्यो बल आउन्याछ. जाइ कटक् नगर्नु. झिकी कटक् गर्नु र चुरेघाटिमा षुपै काटिन्याछ. पाच सात पुस्तालाई षजना पनि मिल्नेछ. श्रीगंगाजिको साथ पनि लाग्नैछ. लडाईमा पुकेन भन्या लोलोपोतो अनेक कलहल गरिकन पनि

संस्कृतच्छाया

दक्षिणस्यां दिशि वर्तमानः समुद्रा ऽ धिपतिः सम्राट् सन्धेयः । परं स धूर्तराजो ऽ स्ति । स भारतवर्षं समाक्रामन् वर्तते । प्रतिवेशिभिर् भूपैः सह स इदानीं युध्यमानो वर्तते । भारतवर्षीया राजानः संगच्छेरन् चेद् मम शरण्यः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कोऽपि न स्याद् इति विचार्य गौरववन्तो नेपाले स्वीयदुर्गं रचयितुम् आगच्छेत् । युद्धे स्थानेऽपसारे चा ।ऽ नुकूलिकतां विचार्य यूयं दुर्गाणि रचयत । आङ्ग्लानाम् आगमनमार्गेऽपि स्थाने स्थाने निरोधकान् रचयत । आङ्ग्लसेना नेपालं जेतुकामा निश्चितम् एवा ।ऽ गमिष्यति । यूयं युद्धे यायिनो न भवत, किन्तु स्थायिनो भवत । चूरेपर्वतकटकमवे युद्धे शत्रुसेनाया महान् नाशो भविष्यति । पुत्रगौत्रीणानि युद्धोपकरणानि यूयं प्राप्स्यथ । अस्मद्-राज्यस्य दक्षिणा सीमा च गङ्गातटं प्राप्स्यति । युद्धे पराजयं प्राप्य बहिः शत्रुनां विहाय स धूर्तराजो व्याजान् कृत्वा ऽ। पि मोहयितुम् अभिलषिष्यति ।

पद्यमयी व्याख्या

नेपालाद् दक्षिणस्यां दिशि निकटतरं भारतं वर्षमास्ते,
तत्रा । ऽ स्ते ऽ ङ्ग्रंजजातिः प्रतिदिनमधुना वर्धमानप्रतापा ।
दूरे मध्येसमुद्रं निजजननमही वर्तते ऽ ङ्ग्रजजातेः,
सा षाड्गुण्यं प्रयुङ्क्ते भरतवसुमतीं जेतुकामा समग्राम् ।।११३।।
सम्बन्धा अस्मदीया बहुलविषयका आसते भारतेन,
सन्धिः स्याच् श्रेयसे ऽ तः सितमुखपतिना भारतस्थेन सार्धम् ।
किन्त्वास्ते धूर्तराजः सितमुखनृपतिस् तेन सार्धं विधातुं
सन्धानं तच्चरित्रं प्रणिहितमनसा सम्यगालोचनीयम् ।।११४।।

सितमुखः = अङ्ग्रेजः

आपारावारकूलं बहुलजनपदं भारतं वर्षमास्ते,
साम्राज्यं भारतीयं मुगलकुलभवैर् भुज्यते भूमिपालैः ।
एते भूपा बभूवुः सकलभरतभूक्रान्तिदृष्टप्रतापाः
शक्त्या नीत्या च सर्वान् अपि धरणिभुजस् त्रासयामासुरेते ।।११५।।

आपारावारकूलम् = समुद्रतीरपर्यन्तम्

वाणिज्यं कर्तुकामा कतिचन चतुरा जातयो बद्धमङ्गा
दूराद् यूरोपदेशाज् जलधिपरिवृताद् भारतं वर्षमायन् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विद्या सांयात्रिकैस् तैः कुहकविषयका वर्तते ऽ भ्यस्यमाना,
धूर्तास्त्वेतासु जातिष्वपि चतुरतमा वर्तते ऽ ङ्ग्रेजजातिः ॥११६॥
सांयात्रिकः = पोतवणिक्

'एवं वहुधा यन्त्रं स्वयंवहं कुहकविद्यया भवति' इति सिद्धान्तशिरोमणौ यन्त्राध्याये ५६ पद्ये भास्करः १२०७ वैक्रमाब्दे जगाद। 'इयं स्वयंवहविद्या समुद्रान्तर्निवासिजनैः फिरङ्गचाख्यैः सम्यगभ्यस्तेति।' इति सूर्यसिद्धान्तस्य ज्यौतिषोपनिषदध्यायस्य २२ श्लोकस्य स्वोपज्ञगूढार्थप्रकाशटीकायां रङ्गनाथः १६५६ वैक्रमाब्दे जगाद। अतो यन्त्रविद्यां कुहकविद्येति पूर्वा ऽऽचार्या मन्यन्ते स्मेति ज्ञायते।

स्वामिन् राजा ऽ धिराज प्रभुवरचरणौ सेवितुं दूरदेशाद्
आगच्छाम प्रभूतं वहुदिवसभवं मार्गकष्टं विषह्य।
राजेन्द्रं सेवमाना अवनतशिरसो भारते वर्तमानाः
सम्यक् शुल्कं ददाना नियममनुगताः कुर्महे पण्यवृत्तिम् ॥११७॥
सम्बद्धं राजनीत्या क्वचन किमपि नो कुर्महे कार्यजातम्,
अस्माकं भारते स्याद् वसतिरनुमता राजराजप्रसादात्।
इत्थं राजा ऽ धिराजं मुगलकुलभवं प्रार्थयन्ते स्म शश्वद्
अङ्ग्रेजाः सार्थवाहा अधिकृतपुरुषं पूजयन्ति स्म रत्नैः ॥११८॥
आयं शुल्कात् समुत्थं विपुलतरमिमे सार्थवाहा विदध्युः,
सम्पद्येरन् पदार्था अपि सुलभतरा दूरदेशा ऽ न्तरस्थाः।
इत्थं सञ्चिन्त्य सम्राड् मुगलकुलजनिः प्रार्थनां स्वीचकार,
स्थाने स्थाने बभूवुर् भरतभुवि शनैर् आपणा आङ्ग्लजातेः ॥११९॥
आङ्ग्लश्रेणी बभार प्रतिदिवसमिव श्रीकृपादृग्विलासान्,
सा श्रेणी मन्दमन्दं लघुतरधरणीपालरूपं च भेजे।
नौकायाने प्रवीणा मुगलनृपचमूं सिन्धुयुद्धे जयन्ती
सा श्रेणी मन्दमन्दं भरतधरणिजां राजनीतिं सिषेवे ॥१२०॥
श्रेणी = शिल्पिनां वणिजां च संहतिः

श्रेणीस्वरूपं यथा मन्दसोरस्थे नवविंशत्यधिकपञ्चशत(५२९)मितस्य वैक्रमाब्दस्या ऽभिलेखे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

.....श्रवणसुभगं धानुर्व्वेदं दृढं परिनिष्ठिताः सुचरितशतासङ्गाः केचिद्विचित्रकथाविदः ।
विनयनिभृतास्सम्यग्धर्म्मप्रसङ्गपरायणाः प्रियमपरुषं पथ्यं चान्ये क्षमा बहु भाषितुं ॥१६
केचित्स्वकर्म्मण्यधिकास्तथान्यैर्व्विज्ञायते ज्योतिषमात्मविद्भिः ।
अद्यापि चान्ये समरप्रगल्भाः कुर्व्वन्त्यरीणामहितं प्रसह्य ॥१७
प्राज्ञा मनोज्ञवधवः प्रथितोरुवंशा वंशानुरूपचरिताभरणास्तथान्ये ।
सत्यव्रताः प्रणयिनामुपकारदक्षा विस्रम्भपूर्व्वमपरे दृढसौहृदाश्च ॥१८
विजितविषयसङ्गैर्द्धर्म्मशीलैस्तथान्यैर्मृदुभिरधिकसत्वैर्लोकयात्रामरैश्च ।
स्वकुलतिलकभूतैर्मुक्तरागैरुदारैरधिकमभिविभाति श्रेणिरेवंप्रकारैः ॥१९
स्पर्शवता वर्णान्तरविभागचित्रेण नेत्रसुभगेन ।
यैस्सकलमिदं क्षितितलमलंकृतं पट्टवस्त्रेण ॥२१
चतुस्समुद्रान्तविलोलमेखलां सुमेरुकैलासबृहत्पयोधराम् ।
वनान्तवान्तस्फुटपुष्पहासिनीं कुमारगुप्ते पृथिवीं प्रशासति ॥२३
समानधीश्शुक्रबृहस्पतिभ्यां ललामभूतो भुवि पार्थिवानां ।
रणेषु यः पार्थसमानकर्म्मा बभूव गोप्ता नृपविश्ववर्म्मा । ।२४
तस्यात्मजः स्थैर्य्यनयोपपन्नो बन्धुप्रियो बन्धुरिव प्रजानां ।
बन्ध्वार्तिहर्ता नृपबन्धुवर्म्मा द्विड्दृप्तपक्षक्षपणैकदक्षः ॥२६
तस्मिन्नेव क्षितिपतिवृषे बंधुवर्म्मण्युदारे सम्यक्स्फीतं दशपुरमिदं पालयत्युन्नतांसे ।
शिल्पावाप्तैर्द्धनसमुदयैः पट्टवायैरुदारं श्रेणीभूतैर्भवनमतुलं कारितं दीप्तरश्मेः ॥२९
मालवानां गणस्थित्या याते शतचतुष्टये ।
त्रिनवत्यधिकेब्दानामृतौ सेव्य घनस्तने ॥ ३४
सहस्यमासशुक्लस्य प्रशस्तेह्नि त्रयोदशे ।
मङ्गलाचारविधिना प्रासादोयं निवेशितः ॥३५
बहुना समतीतेन कालेनान्यैश्च पार्थिवैः ।
व्यशीर्य्यतैकदेशोस्य भवनस्य ततोधुना ॥३६
स्वयशोवृद्धये सर्व्वमत्युदारमुदारया ।
संस्कारितमिदं भूयः श्रेण्या भानुमतो गृहं ॥ ३७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वत्सरशतेषु पंचसु विंशत्यधिकेषु नवसु चाब्देषु ।
यातेष्वभिरम्यतपस्यमासशुक्लद्वितीयायां ।।३६
श्रेण्यादेशेन भक्त्या च कारितं भवनं रवेः ।
पूर्व्वा चेयं प्रयत्नेन रचिता वत्सभट्टिना ।।४४

(दीनेशचन्द्रसरकारकर्तृकस्य कलकत्ताविश्वविद्यालयेन १६६६ वैक्रमाब्दे प्रकाशितस्य सिलेक्ट् इन्स्क्रिप्शन्ज् (उत्कृष्टा अभिलेखा) इत्याख्यस्य ग्रन्थस्य २६२-२६७ पृष्ठेभ्य उद्धृतों ऽ शः)

सिन्धुयुद्धे = समुद्रयुद्धे

ना ।ऽ सीत् सम्यक्प्रतिष्ठा मुगलनृपकुले यौवराज्यव्यवस्था,
तस्मात् सर्वे कुमारा धरणिपतिपदे बद्धतृष्णा बभूवुः ।
ताते रुग्णे मृते वा नृपतिपदकृते मौगला राजपुत्रा
अन्योन्यं युद्धमाना व्यतनिषत पृथु प्राणहानिं व्ययं च ।।१२१।।

धर्मा ऽ न्धत्वं प्रपन्नाः कतिचन मुगलाः सार्वभौमा बभूवुर्,
वैराग्यं तद्नयेन प्रकृतिषु शनकैर् बद्धमूलं बभूव ।
छिद्रं साम्राज्यगेहे व्यधिषत मुगलैर् बद्धवैरा मराठा,
मन्दं मन्दं प्रतापो मुगलकुलभवः क्षीयमाणो बभूव ।।१२२।।

विक्रान्तः पारसीको भरतवसुमतीं नादिरो भूरिसैन्य
आगच्छद्, राजधानीं क्षतहृतविभवां कारयामास दिल्लीम् ।
उष्ट्रा ।ऽ श्वैर् वाहयित्वा मणिकनकचयं नादिरे स्वीयदेशं
याते वीक्षस्वभूवे मुगलकुलभवा दीनता सर्वलोकैः ।।१२३।।

इत्थं राजा ऽ धिराजे मुगलकुलभवे क्षीयमाणप्रतापे
राजस्थानीयवर्गे प्रसभमिव पदं वंशसात् कर्तुकामे ।
साम्राज्याद् मन्दमन्दं पृथगिव विषयो दाक्षिणात्यो बभूव,
बङ्गालो ऽ भूत् तथैवा ऽ नुकरणमवधे तस्य कार्यस्य जज्ञे ।।१२४।।

दीना ऽ। वस्था च राजव्यसनसमुदिता भारतं वर्षमेव
व्याप्नोत्, यस्याः स्वरूपं प्रकटितमभवद् वङ्गदेशे निकृष्टम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सैनान्या कारयित्वा निजधरणिभुजे द्रुह्यता युद्धभूमौ
विद्रोहं गर्धयित्वा तमपि च वणिजः प्रापुराङ्ग्ला नृपत्वम् ॥१२५॥
गर्धयित्वा = मिथ्याफला ।ऽ ख्यानेन वञ्चयित्वा

स्पर्धा सांयात्रिकाणां विविधजनपदस्थायिनां वर्तते, ऽ स्माद्
आत्मा ऽ धीनां वणिज्यां रचयितुमनसः कुर्वते संयुगांस् ते ।
वाणिज्यं भारतीयं वशयितुमनसां साम्प्रतं नैगमानां
नौयाने ऽ तीव दक्षा रणभुवि जयितां प्राय अङ्ग्ला लभन्ते ॥१२६॥
संयुगान् = युद्धानि
नैगमानाम् = वणिजाम्

मैसूरा ।ऽ ख्ये प्रदेशे जलनिधिनिकटे दक्षिणस्यां दिशायां
भूपालो वीर्यशाली यवनकुलनिर् वर्तते हैदरा ।ऽ ख्यः ।
जित्वा सङ्ग्रामभूमौ सितवदनचमूं विद्रुतां कुर्वतो ऽ स्य
स्मृत्वा स्मृत्वा ऽ। वदानं भयचकितमना जायते ऽ ङ्ग्रेजलक्ष्मीः ॥१२७॥
अवदानम् = पूर्वचरित्रम्

वर्तन्ते सांयुगीना अपरजलनिधेः सन्निधिस्था मराठा,
दासीकर्तुं न शेकुर् मुगलकुलनृपा हिन्दुवंश्यान् मराठान् ।
स्वैः सैन्यैः सञ्चरन्ते भरतवसुमतीं कम्पयन्तो मराठास्,
तेभ्यः संत्रस्तचित्ता निशि शयनसुखं नो लभन्ते सिता ।ऽ स्याः ॥१२८॥
सांयुगीनाः = रणनिपुणाः

दायादैः पीड्यमानो मुगलकुलनृपो निर्ययौ राजधान्या,
वंश्यं साम्राज्यपीठं सितवदनबलाद् आत्मवश्यं विदध्याम् ।
इत्याशाबद्धचित्तः सितवदनकरे सो ऽ धिकारं प्रभूतं
प्रायच्छत्, किन्तु काले गतवति बहुले ऽ पीप्सितं ना ।ऽ ससाद ॥१२९॥
आत्मानं गौरवक्त्रैर् मुगलकुलनृपो विप्रलब्धं विचार्य
वीक्षाञ्चक्रे मराठान् सितवदनरिपून् मित्रतापूर्णदृष्ट्या ।
तस्मिन् भूपे मराठाबलपतिसहिते देहलीं राजधानीं
सा ।ऽ नन्दं संप्रविष्टे सितमुखहृदयं दीर्घचिन्ता विवेश ॥१३०॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आयोयितें मराठाबलमभिभवितु' साम्प्रतं को ऽपि नेष्टे,
त्वां मां हन्युर् मराठा इति सितवदनो हिन्दुभीर्ति प्रदर्श्य ।
स्वल्पं खण्डं धरित्र्या अवधनृपतये म्लेच्छवंशोद्भवाय
दत्वा सन्तोष्य भीतं प्रमुदितमनसं चा ऽकरोत् तं स्वपक्षे ।।१३१।।

नेष्टे = न शक्नोति

आस्ते शूरं मराठाबलमतिबहुलं सर्वतः सञ्चरिष्णु,
कर्तव्ये तद्निरोधे तदधिकविनयं भूरि सैन्यं विधेयम् ।
मा भूच् चिन्ता त्वदीया भटगणविनये, द्रव्यचिन्ता ।ऽस्ति किञ्चिद्,
इत्यादत्ते पटीयान् अवधनरपतेर् अर्थराशिं सिता ।ऽस्यः ।।१३२।।

विनयः = सैन्यानां शिक्षणं नियमनं च

साहाय्यं कर्तृकामा अवधनरपपेतर् युद्धभूमौ घना ऽर्थं
गत्वा पञ्चालदेशं यवनकुलभवैः सांयुगीनैं रुहेलैः ।
सार्धं घोरं सिता ।ऽस्या व्यधिषत समरं, बद्धसङ्घा रुहेलाः
स्वातन्त्र्यं त्रातुकामा अशयिषत रणे भूरिसङ्ख्याश् चिराय ।।१३३।।

अन्योन्यं युध्यमाने भरतवसुमतीपालवर्गे सिता ।ऽस्य
एकस्या ।ऽदाय पक्षं परनृपतिमहीम् आत्मभोग्यां विधत्ते ।
एतद्रीत्या समस्तान् भरतवसुयतीपालकान् नाशयित्वा
साम्राज्यं भारतीयं सितवदनपतिर् वर्तते भोक्तुकामः ।।१३४।।

जानीयुः कालगत्या भरतवसुमतीपालका एतमर्थं,
दीप्येत क्रोधवह्निः प्रति सितवदनं तुल्यरूपस् तदीयः ।
तस्मिन् काले शरण्यो नहि भवति पुरा गौरवक्त्रस्य कश्चिज्,
जानीते सूक्ष्ममेतं विषयमतिपटुर् गौरवक्त्रा ऽधिराजः ।।१३५।।

नहि भवति पुरा = निश्चितं न भविष्यति

आपत्तौ दुर्गमेव प्रभवति शरणस्थानमस्माकमस्माद्
दुर्गाणां दुर्ग्रहाणां भवति विरचना सर्वतः श्रेयसे नः ।
नेपाले शैलदुर्गं भवति हितकरं चेति चित्ते विभाव्य
नेपालं जेतुकामो न भवति न पुरा गौरवक्त्रा ऽधिराजः ।।१३६।।

न भवति न पुरा = निश्चितं भविष्यति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्मान् उच्छेत्तु कामाः समय उपगते स्वा ऽनुकूले सिता ऽस्या
आगच्छेयुः प्रभूतोपकरणसहिता भूरिसैन्याः प्रसह्य ।
अस्माभिश् च व्यवस्था समुचितविधिना युद्धहेतोर् विधेया,
किं वा राष्ट्रं निपात्य स्वयमपि पतितैर् म्लेच्छदास्यं निषेव्यम् ॥१३७॥

अस्माकं राष्ट्रमेतद् वशयितुमनसो दक्षिणस्या दिशाया
आगच्छन्ति प्रभूता अहितजनभटा यावदित्थं विचार्य ।
स्थाने युद्धेऽपसारेऽपि समुचिततरान् भूमिभागान् परीक्ष्य
दुर्गाणां दुर्ग्रहाणां भवतु विरचने युष्मदीयः प्रयत्नः ॥१३८॥

यावद् आगच्छन्ति = निश्चितम् आगमिष्यन्ति

कस्मिंश्चित् स्वा ऽनुकूले ऽहनि सितमुखपो व्याजमादाय कञ्चिद्
नेपालं जेतुकामो घटितबहुबलो निश्चयं विग्रहीता ।
आङ्ग्ले युद्धे भवद्भिस् त्ववहितहृदयैः स्थायिता सेवनीया,
यायिःवं युष्मदीयं नहि भवति पुरा तत्र कल्याणकारि ॥१३९॥

नहि भवति पुरा = निश्चितं न भविष्यति

चूरेनाम्ना प्रसिद्धे शिखरिणि कटके वर्तमानाः कठोराः
सङ्कीर्णाः सन्ति मार्गा, वसतु दृढबला तत्र सेना ऽस्मदीया ।
तत्रैवा ऽङ्गलध्वजिन्या सह भवतु रणो, भूरयः शत्रुसैन्या
गच्छेयुः प्रेतराजा ऽतिथिगृहमपरे क्वा ऽपि दूरं प्रलाय्य ॥१४०॥

शिखरिणि = पर्वते

कटके = पर्वतमध्यभागे

युष्माभिर् हन्यमाना सितमुखपृतना ऽनुक्षणं क्षीयमाणा
सङ्ग्रामे शस्त्रजातं निजमपि भविता रक्षितुं नो समर्था ।
आदातुं शस्त्रजातं निखिलमपि रिपोर् ईशिताध्वे च यूयम्,
एता नेपालसीमा हरिति पितृपतेर् जह्नुजायाश् च तीरम् ॥१४१॥

एता = गन्ता

पितृपतेर् हरिति = दक्षिणस्याम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपालं स्वीयदुर्गं रचयितुमनसी गौरवक्त्रा ऽ विपस्य
सम्पद्यंता ऽ भिलाषः समरभुवि यदा भङ्गलाभाद् हता ऽ र्थः ।
बाह्यं वैरं तदाग्रीप्रभृति तु शनकैर् गौरवक्त्रा ऽ धिराजो
हित्वा हित्वा ऽऽ ददीत प्रकटितसुमुखो बाह्यमित्रस्वरूपम् ।।१४२।।

वाणिज्यं वर्धनीयं शुभफलमुभयोर् आवयोर् एव सिद्धयेद्,
इत्युक्त्वा ऽ। र्थप्रणाल्या सितवदनपतिर् भेदमाधातुमिच्छेत् ।
धर्मव्याजेन किं वा कुहकविधिपटुर् गौरवक्त्रा ऽ धिराज
एतद् दुर्गं ग्रहीतुं नवनवविषयान् दर्शयेद् मोहयेच् च ।।१४३।।
कुहकविधिपटुः = यन्त्रविद्यायां चतुरः

अस्माकं देश आस्ते नृपतिनयविदां लोभनीयः पदार्थ,
आस्ते गौरा ।ऽ स्यराजो नृपतिनयपटुर् धूर्तराजा ऽ। धिराजः ।
जीवद्मृत्योः समानं न भवति न पुरा जीवनं म्लेच्छदास्ये,
चिन्तैषा जागरूका निवसतु सततं मानसे युष्मदीये ।।१४४।।
न भवति न पुरा = निश्चितं भविष्यति

दुर्गव्यवस्था

मूलपाठ :

यो नेपालको तषत किल्ला हो. यो किल्ला पायो भन्या चारै बादसाह-लाई बह्राला लाउनैछ, इस्वरले रचना गर्याको किल्ला रहेछ. स्वधनुपर्ने रहेनछ. सिबपुरि १ फुलचोक २ चन्डागिरि ३ महादेउपोषरि ४ पालुं ५ दाप्चा ६ काहुल्या ७ ईनमा पनि किल्ला पकी बनाउनु. किल्लापिछे तोप लम्छट् गरि राषीदिनु र जति भन्ज्यां ई छन् भन्ज्यांपीछे यक यक फलामे ढोका बनाई ढोकापिछे यक यक तोप लम्छट् गरि राषीदिनु र पषांच सिपाहि राषीदिनु र यस्व भयापछि चेवा गर्न्या चर्चा गर्न्या भगन्या नास्न्या ढुकूवा फसादि षनि यस्ताहरुको पनि केही चल्नेछैन. चारै बादसाही चढाई गरि आयो भन्या पनि कसैको केही चल्न्य रहेनछ.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

इयं नेपालद्रोणी दुर्गरूपा वर्तते । अस्य दुर्गस्या ऽग्रे लब्धे चतुरो दिगीशान् सार्वभौमान् अपि दमयितुं प्रभवेत् समरपटुर् जनः । इयं नेपालद्रोणी दैवं दुर्गरूपं वहतीति न संस्कारम् अपेक्षत इति ज्ञायते । शिवपुरीशिखरे फुल्लोचशिखरे चन्द्रागिरिशिखरे महामण्डपशिखरे पालुङशिखरे दापचाशिखरे काहुल्याशिखरे चेति सप्तसु पर्वतशिखरेषु दृढानि दुर्गाणि रचयित्वा तत्र शतघ्न्यः स्थापनीयाः । पर्वता ऽभित्यकागतमार्गेषु प्रतिमार्गं लोहमयं द्वारं रचनीयम्, प्रतिद्वारं शतघ्नी स्थापनीया, तत्र पञ्चशो भटाश्च नियोक्तव्याः । एतादृशे दुर्गरक्षाविधाने कृते सति शत्रुचराणां तत्सहायकानां पलायमानानां विध्वंसकानां कालकाङ्क्षिणां घातकादीनाम्, अपराधिनां चोद्योगा निष्फला भविष्यन्ति । चत्वारो दिगीशाः सार्वभौमा देशम् इमं जेतुं कृतप्रयत्ना अपि सिद्धिं न प्राप्नुयुः ।

पद्यमयी व्याख्या

नेपालद्रोणिरास्ते पृथुलशिखरिभिः सर्वतो वेष्टयमाना,
पर्तन्ते ते महीध्राः प्रकृतिविरचिता रक्षिणो जागरूकाः ।
नेपालद्रोणिरास्ते घटितबहुगुणा शैलदुर्गस्वरूपा,
दुर्गस्या ऽस्य स्वरूपं प्रणिहितहृदयैर् भावनीयं भवद्भिः ॥१४५॥

आशायाम् उत्तरस्यां वसति शिवपुरीनामधेयो महीध्र,
आस्ते शैलः प्रसिद्धो मघवदिशि महामण्डपा ऽख्यां दधानः ।
फुल्लोच्चा ऽख्यां दधानः पितृपतिककुभं शोभयन्नस्ति शैल,
आस्ते चन्द्रागिरिस् तु क्षितिधर उदका ऽधीश्वरा ऽशानिषण्णः
॥१४६॥

मघवदिशि = पूर्वस्याम्
पितृपतिककुभम् = दक्षिणां दिशम्
उदका ऽधीश्वरा ऽशानिषण्णः = पश्चिमायां दिशि वर्तमानः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आशायाम् उत्तरस्यां निवसति शिखरी काहुल्या ऽऽख्यां दधानो,
दाप्चा ऽऽख्यो भाति शैलः ककुभि सुरपतेः, पालुङः पश्चिमायाम् ।
दुर्गीयाः सप्त शैला उपरि निगदिताः सन्ति, संस्कारमेवे
ना ऽपेक्षन्ते महान्तं मनुजविरचितं दुर्गनिर्माणहेतोः ॥१४७॥

सुरपतेः ककुभि = पूर्वस्याम्

दुर्गम् अस्मिन् पर्वते स्याद् इति दुर्गीयः पर्वतः

दुर्गीयेष्वेषु सप्तस्वपि गिरिषु समिच्छिल्पवित्संमतानां
दुर्गाणां दुर्ग्रहाणां भवतु विरचने युष्मदीयः प्रयत्नः ।
मुञ्चन्त्यः स्थूलगोलाञ् ज्वलनपरिवृतान् स्थापनीयाः शतघ्न्यो
दुर्गेष्वेतेषु वासं विदधतु नियतं सैनिकाः सांयुगीनाः ॥१४८॥

समित् = युद्धम्

सांयुगीनाः = युद्धनिपुणाः

यावच्-शृङ्ग-श्रिता ऽध्वं दृढतरघटिता आसतां लोहमय्यो
द्वारस्, तासां कपाटान्यपि कठिनतराण्यायसान्येव सन्तु ।
यावद्द्वारं शतघ्नी रिपुजनहृदयत्रासिनी स्थापनीया,
यावद्द्वारं वसन्तु प्रहरणबहुलाः पञ्चशो द्वारपालाः ॥१४९॥

यावच्-शृङ्ग-श्रिता ऽध्वम् = यावन्तः शृङ्गश्रिता अध्वानो मार्गाः संभन्ति

दुर्गैर् द्वारैश् च सम्यग् विहितविरचनैः रक्ष्यमाणे स्वदेश
ईशीरन् ना ऽपसर्पाः परजनपदजा बोद्धुमस्मद्रहस्यम् ।
हिंस्राः पापाः परस्त्रीधनहरणपरा भीतचित्ताः स्वदोषैर्
दूरं गन्तुं स्वदेशाद् अपि कृतयतनाः स्युर् न साफल्यभाजः ॥१५०॥

अपसर्पाः = चराः

मा भूद् नेपालदेशो रिपुवशग इति स्निग्धदृष्टया समेतो
विश्वेशो ऽमुं समन्ताद् बहुलगिरिवृतं दुर्गरूपं चकार ।
एतद् बुद्ध्वा भवद्भिः समुचितविधिना रक्षिते दुर्गरूपे
नेपालं जेतुमीशाः प्रथितबहुबलाः सार्वभौमाश् च न स्युः ॥१५१॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धर्मा ऽधिकारस्थितीर् निबन्धुम् इच्छा

मूलपाठः

उप्रान्त राजा राम साहले बाध्याको थिति पनि हेरिसके. राजा जयेथिति मल्ले (मल्लले) बाध्याको थिति पनि हेरिसके. राजा महिन्द्र मल्लले बाध्याको थिती पनि हेरिसके. इस्वरले दियो भन्या म पनि यस्ता बन्देजको बान्हहजारको थीती बांधि जाला भन्या अबीलाषा थीयो.

संस्कृतच्छाया

अथ राज्ञा रामशाहेन स्थितिमल्लेन महीन्द्रमल्लेना ऽपि कृताः सर्वा व्यवस्थाः सम्यक् पर्यालोचयम् । ईश्वरश् चेद् अन्वग्रहीष्यद् अहम् अपि प्रजानाम् एतादृशीर् व्यवस्था अकरिष्यम् ।

पद्यमयी व्याख्या

पृथ्वीपाला अनेके गुणगणमहिता अत्र देशे बभूवुस्,
ते वेदैर् धर्मशास्त्रैर् निगदितनियमाल्ँ लोकनिष्टाः स्थितीश् च ।
दर्शं दर्शं बबन्धुः सकलहितकरीः कालयोग्या व्यवस्थाः,
काश्चित् तासाम् इदानीम् अपि जगति जना भूमिपाश् चा ऽनुयान्ति
॥१५२॥

अस्माकं पूर्वजेन प्रथितसुयशसा रामशाहेन राज्ञा
बद्धा लोकव्यवस्थाः प्रणिहितहृदयः साधु सर्वा अपश्यम् ।
स्थित्याह्वेन प्रणीता प्रथमनृपतिना मल्लभूभृत्कुलस्य
सर्वा लोकव्यवस्था मम नयनपथं मानसं चा ऽध्यरोहन् ॥१५३॥

नवीनस्य मल्लवंशस्या ऽदिपुरुषः स्थितिमल्लः

स्थित्यै स्वासां प्रजानां व्यतनुत नियमान् यान् पुरा मल्लवंश्यः
कान्तिक्ष्मापो महीन्द्रो, न्यधिषत हृदये मामकीने पदं ते ।
भूपत्रय्या प्रणीता असुवत नियमाः कान् गुणान् कांश् च दोषान्,
इत्याकारो विचारो ऽपि च मम हृदये वर्तते जागरूकः ॥१५४॥

कान्तिपुरा ऽधीशो महीन्द्रमल्लः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अद्यत्वे का व्यवस्थाः प्रकृतिहितवहाः सन्ति, का नोपयुक्ता
इत्थं कृत्वा विमर्शं समुचितनियमान् नूतनान् योजयित्वा ।
हित्वा हानिप्रदांस् तान् प्रकृतिहितकरीं नव्यरूपां व्यवस्थां
नेपाले ऽहं न्यभन्त्स्यं यदि मयि करुणां विश्वनाथो ऽकरिष्यत् ।।१५५।।

लिङ्निमित्ते लृङ् क्रियाऽतिपत्तौ ३।३।१३९ इति लृङ्

याम्योत्तरगो मार्गः

मूलपाठ :

पुरुब पछिम्को रस्ता बन्ध गरि नेपालको रस्ता चलाईदिउला.

संस्कृतच्छाया

ईश्वरश् चेद् अन्वग्रहीष्यद् नेपालाद् भोटगामिनः प्राच्यान् प्रतीच्यांश् च मार्गान् निरुध्य नेपालद्रोण्या भोट गामिनं मार्गं च प्रशस्ततरम् अकरिष्यम् ।

पद्यमयी व्याख्या

भोटाद् देशाद् यियासुर् भरतवसुमतीं, भारताद् भोटदेशं
प्रेप्सुर् यश् चाऽस्ति, तस्मै वितरति पदवीम् एष नेपालदेशः ।
विद्वांसः सार्थवाहा उभयविषयजाः प्राकृता मानवाश् च
गच्छन्त्यन्योन्यदेशं बहुतिथसमयाद् एव नेपालसृत्या ।।१५६।।

सृत्या = मार्गेण

अस्माकं सार्थवाहा भरतवसुमती–भोटनिष्ठां वणिज्यां
कुर्वन्त्वेषां समृद्धिः प्रतिदिनमुदिताद् इत्यहं चिन्तयामि ।
प्राज्यैः पण्यैर् महाऽर्हैः सह विपुलजनाः सार्थवाहाश् चरन्ति,
हिंस्रेभ्यः संहतेभ्यः पथि भवति भयं तस्करेभ्यश् च तेषाम् ।।१५७।।

उदिताद् = उदेतु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हिंस्रेभ्यस् तस्करेभ्यो ऽपि च भवतु भयं स्वप्रजानां न जातु,
मा भूवन् भीतचित्ता निजजनपदजाः सार्थवाहा विहर्तुम् ।
भोटे देशे वणिज्यां विदधतु वणिजो निर्भया अस्मदीया
इत्याकारो विचारो मनसि कृतपदो वर्तते मामकीने ॥१५८॥

अध्वानो भोटदेशाद् भरतवसुमतीं प्राप्नुवन्तः पुराणाः
पूर्वस्यां पश्चिमायाम् अपि दिशि कतिचित् सन्ति नेपालदेशे ।
संस्कर्ता रक्षिता वा पथिषु नहि जनो दृश्यते को ऽप्यमीषु,
स्वैरं मार्गैर् अमीभिः परजनपदजाः सञ्चरन्ते चरा ।ऽद्याः ॥१५९॥

एतैर् मार्गैर् अगुप्तैः परजनपदजाः सार्थवाहाश् चरन्ति,
घट्टस्थानानि हित्वा कपटपटुतया नैव यच्छन्ति शुल्कम् ।
गृह्णन्तो भूरि मूल्यं प्रतरणनिपुणा वञ्चयन्ते प्रजाश् च,
पृथ्वीभर्तुः प्रजानाम् अपि च विदधते हानिमेते प्रभूताम् ॥१६०॥

घट्टो नदीतीरा ।ऽदिस्थानम्...आदिना गुल्मप्रतोल्या।दि । तत्र यद् देयं नैतव्या ।ऽनेतव्यवस्तुसम्बन्धी राजग्रा।ह्यो भागः स शुल्कः स्याद् इत्यमरकोशस्य २।८।२७ व्याख्यायां महेश्वरः ।

मार्गाः प्राच्याः प्रतीच्या भरतवसुमती-भोटगाः स्युर् निरुद्धा,
नेपालद्रोणिनिष्ठो भरतवसुमती-भोटगः संस्कृता ।ऽत्मा ।
हीनश् चौरा ।ऽदिभीत्या सुविहितवसतिर् गौल्मिकै रक्ष्यमाणो
नव्यो वाणिज्यमार्गः स्वविषयहितकृत् स्याद् इयं कामना मे ॥१६१॥

गुल्मः = घट्टदेशे रक्षणार्थं स्थापितं सैन्यम्
गौल्मिकः = गुल्मस्या ऽधिकृतः

लोकस्थिते रक्षा

मूलपाठः

आपना अना जातविसेषको कर्म गर्नु भन्नेज गरि जाला.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

ईश्वरस् चेद् अन्वग्रहीष्यत् स्वस्वजात्यनुसारिणीः क्रिया जनाः कुर्वन्त्विति नियमान् अभन्त्स्यम् ।

पद्यमयी व्याख्या

अन्योन्यं स्पर्धमानं निजनिजनृपतिं ग्रामभूपोपमेयं
स्वल्पाः स्वल्पाः प्रदेशा असदृशचरिता आश्रयन्ते प्रभूताः ।
तैः स्वल्पैर् भूमिखण्डैर् लघुमणिसदृशैर् एकसूत्रे निबद्धैर्
आस्ते सम्पद्यमानं घटितबहुगुणं हारवद् राष्ट्रमेकम् ॥१६२॥

एषा पूर्वव्यवस्था, भवति किमुचितं साम्प्रतं केति लोका
राजद्वारं प्रयान्ति प्रतिदिवसमिव स्वीयकर्तव्यनिष्ठाः।
सादृश्ये कार्यनिष्ठे सति च विसदृशीर् यो व्यवस्था ब्रवीति,
तस्या ऽज्ञा भूमिभर्तुः प्रकृतिजनमनोग्राहिणी जायते न ॥१६३॥

कश्चित् क्षुत्क्षामकण्ठो न भवतु मनुजो जीविकाया अभावाच्,
छित्त्वा वृत्तीः परेषां सफलयतु जनः को ऽपि न स्वां धनायाम् ।
इत्थङ्कारं विचार्य प्रथमबुधकृतां वीक्ष्य वर्णव्यवस्थां
सम्यग् जातिव्यवस्थां समयसमुचितां कर्तुमिच्छा ममा ऽस्ते ॥१६४॥
धनायाम्=लोभम्

दहचोकशिखरिणि राजधानी

मूलपाठः

यो तिन सहर भन्याको चिस्व ढुंगो रहेछ. षेलषाल मात्रै ठुलो रहेछ. कुपको पानि षान्याछेउ बुधि पनि हुँदैन. सुरो पनी हुँदैन. षेलषाल मात्रै रहेछ. मेरो मनसुबा ता दहचोकमा दरबार बनाउला र चारै विसा थरघरको गुरप्रोहित भैयाद भारादार मिर उमराउको घर बनाई छुट्टा दरबार बनाउला र ई तिन सहरमा ता दरबारबाट स्बषसयल्लाई मात्रै जाला भन्यां यस्तो अविलाष थीयो.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

नेपालद्रोण्या इयं पुरत्रयी शीतका प्रतिभाति । अत्र कपटप्रपञ्चाः प्रचुरा दृश्यन्ते । कौपीर् अपः पिबत्सु जनेषु बुद्धिर् अपि न दृश्यते, शौर्यम् अपि न दृश्यते, कपटप्रपञ्च एव दृश्यते, ईश्वरश् चेद् अन्वग्रहीष्यद् दहचोकपर्वत-शिखरे स्वं प्रासादम् अरचयिष्यम्, तं प्रासादं परितो मौलानां गुरूणां पुरोहितानां स्ववंश्यानां महामात्राणां सेना ऽ। ध्यक्षाणां च पृथक् पृथग् गृहाण्यरचयिष्यम् । अस्मिन् पुरत्रये तु कतिचनोत्सवमयान् दिवसान् एवा ऽ यापयिष्यम् ।

पद्यमयी व्याख्या

योजं योजं प्रभूतांस् तुहिनशिखरिणं संश्रितान् भूमिभागान्
रोधं रोधं सधैर्यं भरतवसुमती–चीनसीमाप्रसारम् ।
स्थायं स्थायं स्वशक्तौ प्रणिहीतहृदया राजधर्मं श्रयेम
चेत् सम्पद्येत पृथ्व्याम् अपि च चिरतरस्थायि नेपालराष्ट्रम् ॥१६५॥

आभीक्ष्ण्ये णमुल् च ३।४।२२

अस्माकं राज्यमास्ते प्रतिशरदमिव स्फातिमासेवमानं,
वर्धन्ते सैन्यवर्गा अधिकृतपुरुषा राजकृत्याश् च तद्वत् ।
भूयस्यः कार्यशाला नियतवसतयो राजकार्यस्य हेतोर्
वर्तन्ते ऽ वश्यकार्याः, स्थिरवसतिरतो ऽ पेक्ष्यते राजधानी ॥१६६॥

प्रतिशरदम्=प्रतिवर्षम्

स्फातिम्=वृद्धिम्

राजकृत्याः=राजकार्याणि । कृञः श च ३।३।१०० इति कृधातोः क्यप्प्रत्ययः

नेपालद्रोणिनिष्ठं त्रितयमपि पुरां वर्तते रम्यरूपं,
यत्र प्रासादपङ्क्तिर् लसति सह मनोहारिणीभिः कलाभिः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रम्यैस् तौर्यत्रिका ऽऽद्यैः कतिचन दिवसांस् तत्र शक्रोत्सवाऽऽदौ
सानन्दं यापयेयं प्रतिसममिति मे कामना बोभवीति ॥१६७॥

तौर्यत्रिकं नृत्यगीतवाद्यं नाटचमिदं त्रयम् इत्यमरः १।७।१०

शक्रोत्सवादौ=इन्द्रयात्रादौ

प्रतिसमम्=प्रतिवर्षम्

बोभवीति यङ्लुकि ।

द्रोण्या नेपालगाथा विलसनविषया ऽऽसते पत्तनेषु,
नाना ऽऽकाराः प्रभूता जननयनमुषः सन्ति कूटप्रपञ्चाः ।
शौर्यप्रज्ञा ऽऽनुबद्धा समरनिपुणता भासते न प्रभूता,
ना ऽऽस्ते शुद्धं जलं च, स्थिरवसतिरतो रोचते मे न तत्र ॥१६८॥

नेपालद्रोणिनिष्ठं त्रितयमपि पुरां दुर्गरूपं बिभर्ति,
दुर्गा ऽन्तःस्थैर् निकाय्यैर् नगरसरणयः सन्ति सङ्कीर्णरूपाः ।
तत्रा ऽन्येषां बहूनाम् अपि च यदि भवेत् सन्निपातो गृहाणां
नश्येत् तासां पुरीणां बहुतिथसमयाद् रक्षितं दुर्गरूपम् ॥१६९॥

निकाय्यैः= गृहैः

सरणयः=मार्गाः

वर्तन्ते ऽमूर् नगर्यः परिवृतवपुषो भूमिभागैर् बहिःस्थैः
कुल्या ऽऽम्भःसिच्यमानैर् बहुफलजनकैः क्षेत्ररूपैः समन्तात् ।
बाह्ये भागे पुरीणाम् अपि च यदि भवेत् संनिवेशो गृहाणां
केदाराः स्युर् विनष्टा, बहुमनुजविपद् भोज्यवस्तुक्षयात् स्यात् ॥१७०॥

केदाराः=क्षेत्राणि

ना ऽत्युच्चो दहचोकनामकगिरिः क्षेत्रैर् गृहैर् वर्जितो
दुर्गीयः शुभतोयवायुसहितः स्वास्थ्यप्रदो दृश्यते ।
नव्यैस् तत्र पृथक् पृथग् विरचितैर् गेहैः समन्ताद् वृतः
प्रासादो ऽस्तु नवः, स एव शिखरी स्याद् राजधानी नवा ॥१७१॥

दुर्गम् अत्र स्याद् इति दुर्गीयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नूत्नायां राजधान्यां भवतु नृपगृहे नूतने मे निवासस्,
तत्रा ऽऽचार्यः पुरोधा नरपतिकुलजा मौलवर्गः प्रधानाः ।
सेना ऽध्यक्षा लभन्तां निजपदसदृशं नव्यमेकैकगेहं,
मा द्राक्षुर् लोभदृष्टया नरपतिपुरुषा नागराणां गृहाणि ॥१७२॥

प्रधानाः=महामात्राः
नागराणाम्=नगरवासिनाम्

कुर्याम् इत्यादिरूपाः प्रकृतिहितकरीर् न्यायमूला व्यवस्था,
दूरीकुर्यां प्रजानाम् अभविकजननीर् भूयसीः कुव्यवस्थाः ।
इत्याशाबद्धचित्ते मयि नयसरणिं याति दुर्व्याधिवात्या
मध्येमार्गं तमिस्रे बत गमयति मे जीवनज्योतिरन्तम् ॥१७३॥

अभविकम्=अकल्याणम्
वात्या=वातसमूहः

पर्सप्रदेशे विपणिः

मूलपाठः

उप्रान्त ।। देसका महाजन्लाई गोडप्रसाहदेषी उभ आउन नदिनु. देसका महाजन्हरु हाम्रा मलुकमा आया भन्या दुनिंञां कंगाल गरि छाड्दछन्.

संस्कृतच्छाया

परदेशजाः सार्थवाहाः पर्सप्रदेशस्थं दुर्गं यावद् एव विशन्तु । परदेशजाः सार्थवाहा अस्माकं देशं विशेयुश् चेत् ते प्रजाः दरिद्रीकुर्युः ।

पद्यमयी व्याख्या

अल्पिष्ठाया हि नीव्या अधिकतमफलं लिप्सते पण्यवृत्तिस्,
तस्मात् प्रच्छन्नचौरा वणिज इति बुधा नीतिकारा ब्रुवन्ति ।
भूयिष्ठं लाभमाप्तुं निजसदनसुखं प्रोज्झ्य कष्टं विषह्य
संप्राप्ताः सार्थवाहाः परजनपदजा नीवृतं पीडयन्ति ॥१७४॥

नीव्याः=मूलधनात्
नीवृतम्=जनपदम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ते धूर्ताः सार्थवाहाः परजनपदजा नीवृतं पीडयन्तस्
चित्वा चित्वा प्रभूतं द्रविणसमुदयं प्रापयन्ति स्वदेशम् ।
आस्माकीनो दरिद्रो भवति जनपदो, निर्धनत्वात् प्रजानां
नानारूपाः कुकृत्या दुरितसहभुवो लोभमूला भवन्ति ॥१७५॥

द्रविणसमुदयम्=धनराशिम्

मा भूद् दैन्यं प्रजानाम् इति नियमवती स्थापनीया वणिज्या,
पर्सादुर्गप्रदेशे निजजनपदजाः सार्थवाहा वसन्तु ।
पर्सादुर्गं हि यावत् परजनपदजा सार्थवाहा विशन्तु,
तत्राऽन्योन्यं विदध्युर् विविधविषयजाः सार्थवाहा वणिज्याम् ॥१७६॥

स्वदेशजं वस्त्रं परिधेयम्

मूलपाठः

हामीले च्यागापांगा लाई तिन सहर नेपाल र नौलाष् किरायत र हिन्दुपतिको राज आर्ज्यंथ्येउ. देसका कपरा लगाउनालाई मन्हाई गरिदिनु. आफ्ना देसका कपरा बन्न ज्यान्यालाई नमना देषाई सधाउनु र बन्न लाउनु र यस्व भया नगत देस जादैन.

संस्कृतच्छाया

स्वदेशे रचितम् एव साधारण वस्त्रं परिदधाना वयं नेपालद्रोणीभाञ्जि त्रीणि राज्यानि हिन्दुपतिपदभूषितानां सेनानां च त्रीणि राज्यानि व्यजयामहि । परदेशजं वस्त्रं जना न परिदधत्विति राजाऽऽज्ञा घोषणीया । स्वदेशजास् तन्तुवाया अभीष्टरूपे वस्त्रे परिचितविनया विधेयाः। लब्धाऽभ्यासैस् तैस् तन्तुवायैर् अभीष्टरूपाणि वस्त्राणि रचनीयानि । इत्थङ्कारं स्वदेशजं धनं विदेशं न प्राप्नोति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्वे देशे तन्तुवाया रुचिरमरुचिरं वां ऽ। शुकं यद् वयन्ति,
तद् वस्त्रं धारयामो, निजजनपदजं स्वं निदध्मः स्वदेशे ।
अस्माकं नीतिरेषा व्यधित बलवतीं वाहिनीं, सा व्यजेष्ट
भूमीशान् सेनवंश्याज् ज्वलन ३ परिमितांस् तद्मितान् मल्लवंश्यान्
॥१७७॥

स्वम्=धनम्

अस्मद्देशे वसन्तः कृशतरविभवाः श्रीकृपाशालिनो वा
बाह्याद् देशाद् उपेतं परिजहतु जना वस्त्रजातं समस्तम् ।
स्वीये देशे समुत्थं परिदधतु जना अत्र वासः सदेति
राजा ।ऽ ज्ञा घोषणीया सहपटहरवं नीवृति स्वे समस्ते ॥१७८॥

वासः=वस्त्रम्

अस्माकं तन्तुवायाः प्रतिपुरि वसनं प्रत्नरूपं वयन्ति,
कर्तव्यास् ते यथास्वं विदितपरिचया ईप्सिते वस्त्ररूपे ।
लब्धा ऽ भ्यासैः कुविन्दैर् वसनमधिभुवः स्वेप्सितं वाययन्तु,
विस्तार्या वस्त्रशिक्षा, द्रविणमपि निजं रक्षणीयं स्वदेशे ॥१७९॥

अधिभवः=नेतारः

स्वदेशजं कुप्यं विदेशे निष्क्रम्यम्

मूलपाठः

आफना देसको जिनीस् जरिबुटि देस लैजानु र नगत थैचनु. नगत थैचि राखनु र प्रजा मोटा भया दर्बार बलियो रहन्छ.

संस्कृतच्छाया

स्वदेशजम् ओषध्यादिकं कुप्यं परदेशे निष्क्रम्य स्वदेशे हिरण्यं प्रवेश्यम् । प्रजासु पुष्टासु राजा पुष्यति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पद्यमयी व्याख्या

देशे ऽस्मिन्नस्मदीये लघुपृथुतनवः सन्ति शैला अटव्य,
उत्पद्यन्ते पदार्था मनुजहितकरास् तत्र नानाप्रकाराः।
ते संचेयाः परीक्ष्याः, स्वजनपदकृते यावतां स्यात् प्रयोगस्
तावन्तः स्थापनीया इह, परविषयं शिष्यमाणाः प्रहेयाः ॥१८०॥

लघुपृथुतनवः= लघ्वाकारा बृहदाकाराश् च
परविषयं प्रहेयाः= परदेशे प्रेषणीयाः

अल्पीयांसः पदार्थाः परजनपदजा यत्र पण्या विशन्ति,
भूयांसः प्रव्रजन्ति स्वजनपदभवा नीवृतस् ते यतश् च।
तत्र श्रीः सा ऽनुरागा वसति जनपदे, भूयसीनां प्रजानां
तत्रत्यानां समृद्धिर् भवति च शनकैर्, वर्धते राष्ट्रतेजः ॥१८१॥

यतो नीवृतः=यस्माज् जनपदात्

राज्ञः कोषः प्रजाः

मूलपाठः

राजाका भंडार भन्याका रैतानहरू हुन्.

संस्कृतच्छाया

राज्ञः कोषो नाम प्रजाः।

पद्यमयी व्याख्या

प्रासादस्थं हिरण्यं विरचयति नृपं नो तथा शक्तिमन्तं,
सद्भक्तिर् लोकहृत्स्था विरचयतितरां तं यथा शक्तिमन्तम्।
बुद्ध्वैतद् नीतिवाक्यं प्रकृतिहितविधौ चेष्टते यो नृपालो,
हित्वा स्वीयं चलत्वं बहुजनगदितं तं सदा सेवते श्रीः ॥१८२॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृत्यं कृत्वा स्वकीयं निजजनपदजा जीवनं प्राप्नुवन्तु,
भोज्यं वस्त्रं च वासं गृहजनमपि ते रक्षितुं शक्नुवन्तु ।
अस्माकं जीविकाया अपहरणकृते शात्रवा बद्धसङ्घा
अस्माकं वीक्ष्य शक्तिं भयचकितहृदः स्वोद्यमं संत्यजन्तु ॥१८३॥

जीवनम्= जीविकाम्
शात्रवाः= शत्रवः

आस्माकीने लघिष्ठे ऽप्यपनयजनिते जायमाने ऽपराधे
शत्रोर् एधेत शक्तिस्, तुहिनशिखरिणं पीडयेद् रोदयेत् सः ।
अस्माच् चित्ते ऽस्मदीये नयसहचरितं भातु शौर्यं सदेति
चिन्ता ऽऽस्ते मानसे मे विहितदृढपदा पद्धतेर् दर्शिका ऽस्याः ॥१८४॥

अपनयः= दुर्नीतिः
तुहिनशिखरिणम्= हिमालयम्

करग्रहणे क्रेतृसङ्घर्षरीतिर् न प्रवर्तनीया

मूलपाठः

मलुकमा ईजारा पनि नदिनु. सर्कारबाट अमानित् राषि सर्कारिया तहसिल् राषी सालबसाल्को कचा लिनु.

संस्कृतच्छाया

कर्षकादिभ्यः प्रजाभ्यो राज्ञे देयं करं गृहीत्वा यो राज्ञे ऽधिकतमं करं प्रतिजानीते, स एव करग्रहणा ऽधिकारी भवत्विति नियमेन करो न ग्राह्यः । राजकीयम् अधिकरणं स्थापयित्वा तेना ऽधिकरणेन राजकीयं करं गृह्णातु राजा । प्रतिवर्षं तस्या ऽधिकरणस्या ऽऽयव्ययपरीक्षा च कार्या ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पद्यमयी व्याख्या

यो दातुं भागधेयं प्रचुरतममिलापालकाय प्रतिज्ञां
कुर्याद् मर्त्यः स एव प्रभुवरपदवीं प्राप्नुयात् कर्षकाणाम् ।
लब्ध्वा ऽसौ कर्षकेभ्यः करमवनिभुजे स्वप्रतिज्ञाऽनुसारं
दत्त्वा भुञ्जीत शेषं स्वयमिति भवति क्षेतृसङ्घर्षरीतिः ॥१८५॥

भागधेयम्= करम्
इलापालकाय= राज्ञे

चेद् दीयेता ऽधिकारः करहरणविधौ क्षेतृसङ्घर्षरीत्या
यावच्छक्ति प्रभूतं कृषकसमुदयाद् भागधेयं जिघृक्षुः ।
व्याजान् नानास्वरूपान् रचयितुमपि नो सङ्कुचेत् सो ऽधिकारी
त्याज्या ऽतः स्वप्रजानाम् अभविकजननी क्षेतृसङ्घर्षरीतिः ॥१८६॥

अभविकजननी= अकल्याणकरी

स्थाने स्थाने पृथिव्याः पतिरधिकरणं स्थापयेद् राजकीयं
सञ्चेतुं राजभागं पृथगधिकरणं तत्र तत्रैव कुर्यात् ।
एतावान् भागधेयः प्रतिसममवनीपालकोशं प्रवेश्यस्,
तत्रेमौ सिद्धसाध्यौ पृथगिति च भवेद् गाणनिक्या ऽधिकारः ॥१८७॥

प्रतिसमम्= प्रतिवर्षम्

राजग्राह्य एतावति कर एतावान् गृहीत इति सिद्धः । एतावांश् च ग्राह्य इति साध्यः ।

महामात्राः सैनिकाश् च धनं ना ऽर्जयेयुः

मूलपाठः

क्या चुनी सिपाई भया क्या भैंभारादार भया इनलाई दवलथ कामाउन नदिनु. आदमी हेरि हुर्मत् मात्रै राखीदिनु. क्यान भनीला दवलथ् भयाकाले तरवारमा पसि मर्न मार्न सकैनन् र हरिपको चपक् हुन्छ. सिपाहि भैंभारादारले स्वष गरेनन् भन्या चारै षुट्मा मेरो तरवार बजनैछ. स्वषमा पसो भन्या.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

सैनिका महामात्राश् च धनं संचेतुम् अवसरं न लभेरन् । स्वपदसदृशीं लोकयात्रां विधातुन् एव ते प्रभवेयुः । धनिकाः पुरुषा जीवं वा पातयेयं कार्यं वा साधयेयम् इति गर्जन्तः सङ्ग्रामभूमौ रिपुभिः सह संगन्तुं सङ्कुचेयुः । अतः शत्रुप्रतापो वर्धेत । सैनिका महामात्राश् च विलासिनो न स्युश् चेद् मम वाहिनी चतस्रो ऽपि दिशो जयेत् । ते विलसनरसिकाश् चेद् भवेयुर् मया कष्टेन समुपार्जितम् इदं राज्यम् अपि नश्येत् ।

पद्यमयी व्याख्या

लक्ष्म्या साकं रमन्ते विलसनविषयाः प्रायशो मर्त्यलोके,
जायन्ते मन्दमन्दं विलसनरसिकाः प्राय आलस्यभाजः ।
आलस्या ।ऽक्रान्तचित्ता विदधति सफला मानवा न क्रियाः स्वा,
भग्नासु स्वक्रियासु प्रवसति हृदयाच् शूरता मन्दमन्दम् ॥१८८॥

योद्धारो यत्र देशे विलसनरसिकाः शौर्यहीना भवेयुर्
दृश्येरंस् तत्र देशे रिपुकरविधृता उज्ज्वलाः खड्गधाराः ।
मा भूद् देशः स्वकीयो रिपुवशग इति प्रेक्षया सावधानो
लक्ष्मीसेवाविधाने भजतु नरपतिः संयमं सर्वदैव ॥१८९॥

प्रेक्षया= बुद्धया

सेना ।ऽध्यक्षा अमात्या अधिकृतपुरुषा बान्धवा राजकीयाः
स्वं कृत्यं सावधाना विदधतु नियतं सर्वदेति क्षितीश :
ते कर्तुं लोकयात्रां निजपदसदृशीम् ईशतां किन्तु भूरि
द्रव्यं चेतुं लभन्ताम् उचितमवसरं नेति चिन्तां विदध्यात् ॥१९०॥

स्वे राष्ट्रे शत्रुसैन्यैर् घटितबहुबलै रुध्यमाने समन्ताद्
आढ्या मर्त्याः स्वकीयं द्रविणसमुदयं रक्षितुं सक्तचित्ताः ।
सम्पद्यन्ते तदर्थं विदधति बहुलं कृत्यजातं, परन्तु
तेषां मन्दा युयुत्सा भवति, नरपतिं स्वं च ते वञ्चयन्ते ॥१९१॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शत्रुः पद्भ्यां प्रकामं प्रहरतु, विलयं यातु राष्ट्रं स्वकीयं,
ध्वंसन्तां बान्धवाः स्वे प्रतिदिनमथवा दुःखभाजो रुदन्तु ।
अस्माकं द्रव्यमात्रं व्रजतु न विलयं, येन कालं नयेम
भुक्त्वा पीत्वेति वक्तुं चरितुमपि तथा नैव ते सङ्कुचन्ति ॥१९२॥

हन्यां प्रत्यर्थिवर्गं किमुत निजतनुं पातयेयं रणा ऽ ग्ना-
वेवं ध्यायन् मनुष्यो निजभुजतरसा कम्पयेच् शत्रुसेनाम् ।
लक्ष्मीशाली विलासी नहि भवति तथा कर्तुमीशः कदाचित्,
सेना ऽ ध्यक्षा ऽ दिवर्गे सति धनबहुले नो भवेद् राष्ट्ररक्षा ॥१९३॥

निजभुजतरसा= स्वबाहुबलेन

अस्माकं वंशजाता अधिकृतपुरुषाः सैनिकाश् च स्वराष्ट्र-
स्वार्थं संवीक्षमाणा विलसनविषयान् दूरतश् चेत् त्यजेयुः ।
अस्मद्राष्ट्रस्य कीर्तिः प्रतिदिनमवनिं छादयेद् एधमाना,
वाह्न्यश् चा ऽ स्मदीया निजभुजतरसा कम्पयेयुः समस्तान् ॥१९४॥

सम्पद्येरन् विलासप्रणिहितहृदया अस्मदीया जनाश् चेत्
प्राज्यैः कष्टैः प्रसिद्धा बहुसमयभवा साधनेयं मदीया ।
सम्पद्येत प्रलीना, कतिपयदिवसैर् जन्मभूर् वीरजातेर्
एषा भूमिश् च रुद्याद् निजकुतनयजैर् दुश्चरित्रैश् चिराय ॥१९५॥

मया समुपार्जितम् इदं राष्ट्रम् उच्चावचजातिजानां सर्वासां प्रजानां साधारणी पुष्पवाटिका

मूलपाठः

मेरा साना दुषले आर्ज्याको मलुक होईन. सबै जातको फुल्बारि हो. सबैलाई चेतना भया यो फुल्बारिको छोटा बडा चारै जात छतिसै बर्नले यो असिल् हिन्दुस्थाना हो. आपना कुलाधर्म नछोड्नु.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

मया महता कष्टेन समुपार्जितम् इदं राष्ट्रम् उच्चावचजातिजानां सर्वासां प्रजानां साधारण्यं दधाना पुष्पवाटिका वर्तते । चतुर्षु वर्णेषु षट्त्रिंशति जातिषु च विभक्ता उच्चावचाः सर्वाः प्रजा इदं राष्ट्रम् उत्तमा हिन्दुभूमिर् इति मन्वानाः स्वकुलधर्मं न त्यजेयुः ।

पद्यमयी व्याख्या

यावज्जीवं द्विषद्भी रणभुवि विहिताः शस्त्रवृष्टीर् विषह्य
बुद्ध्या तेषां प्रयोगान् विविधविषयकान् दूरतः संनिरस्य ।
या भूः प्राप्ता मया तां निजसदनतया भावयन्तः समस्ता
वर्णा अन्ये च सर्वे निजजनसुखदां वाटिकां जानतां स्वाम् ॥१९६॥

वर्णा वा तद्बहिःस्था अधिगतपृथुताः क्षुद्रतां संश्रिता वा
प्रेक्षावन्तो मनुष्या निजगृहमिति ये देशमेतं श्रयन्ते ।
साधारण्यं दधानां विविधसुमचितां वाटिकां ते स्वकीयां
मन्वाना देशमेतं दधतु निजमनः सन्ततं रक्षणे ऽस्य ॥१९७॥

अधिगतपृथुताः= महत्त्वं प्राप्ताः

प्रेक्षावन्तः= बुद्धिमन्तः

अस्माकं देश आस्ते पृथुलशिखरिभिर् निम्नगाभिः सरोभिः
पुण्यैर् देवर्षिसेव्यैर् अधिगतवसतिः सिद्धिदः साधकानाम् ।
यत्रा ऽऽस्ते शैलराजस् तुहिनवृततनुर् दूरतः प्रेक्षणीयो ऽ-
ध्यास्ते यं विश्वसृष्टिस्थितिविलयकरः पार्वतीजानिरीशः ॥१९८॥

पार्वतीजानिः= गौरीपतिः

हिन्दुद्वेषं प्रभूतं निजहृदि नियतं कालिकं धारयन्तो
भूमीशा म्लेच्छवंश्या बहुतिथसमयाद् भुञ्जते भारतक्ष्माम् ।
गोहत्या ऽऽदयाः प्रभूताः कलुषसमुदया भारते दृश्यमाना
अस्माकं देशमेतं शुभनियतिवशाद् ना ऽद्ययावत् स्पृशन्ति ॥१९९॥

प्रकृष्टो दीर्घः कालो ऽस्य कालिकः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ध्यायं ध्यायं चिराय प्रणिहितहृदयास् तत्त्वमापुर् यदन्तः
कारं कारं परोक्षां ददृशुरवहिता यद् बहिः पूर्वविज्ञाः ।
तत्प्रामाण्या ऽ नुसारं व्यवहृतिविषयान् सावधानाश् चरन्तो
भुक्तिं मुक्तिं च लब्धुं सुखमिह सकला मानवाः शक्नुवन्ति ।।२००।।

अस्मद्धर्मं द्विषन्तः कुहकसुपटवो वाक्प्रपञ्चप्रवीणा
आगच्छन्त्यत्र केचित् परजनपदतश् छद्मवेषा मनुष्याः ।
अत्रत्यान् मुग्धचित्तान् कतिचन मनुजाल्ँ लोभयित्वा पुराणाद्
आचाराच् च्यावयित्वा स्ववशमुपगतान् कुर्वते ते स्वशिष्यान् ।।२०१।।

अस्माकं सैन्यशक्तिं विविधविषयका गोप्यरूपा व्यवस्थास्
तोयस्थानानि मार्गान् समरसमुचितान् पार्वतान् भूमिभागान् ।
स्वैः शिष्यैर् गुप्तरूपैर् धृतयतिवसना जानते ते प्रयत्नाद्,
अस्मद्देशं जिगीषोः सितवदनपतेः प्रापयन्ति श्रवश् च ।।२०२।।

धृतयतिवसनाः= भिक्षुवेषाः
श्रवः= कर्णम्

स्वा ।ऽ चारे ऽ स्मत्कुलोत्थे न भवतु सुदृढा बद्धमूला सदास्था,
श्रद्धा धर्मे स्वकीये भवतु च हृदि नः क्षीयमाणा क्रमेण ।
देवेषु स्वेषु सर्वेष्वपि च शिथिलतां यातु नः पूज्यबुद्धिर्
इत्थङ्कारं विचार्य प्रणिगदति वचो नूतनो योगिसङ्घः ।।२०३।।

केचिच् शम्भुं श्रयन्ते, कतिचन सुगतं, वासुदेवं परे तु,
केचित् काञ्चिच् च शक्तिं, गणपतिमपरे, सूर्यमन्ये भजन्ते ।
एवं चित्ते स्वकीये दृढनिहितपदां देवतां शुद्धभक्त्या
ध्यायन्तः स्वीयधर्मं विदधति मनुजा अस्मदीये ऽ त्र देशे ।।२०४।।

सुगतम्= बुद्धम्

स्वा ऽ भीष्टं देवमेकं हृदि दृढतमया सेवमानो ऽ पि भक्त्या
मर्त्यः सामान्यभक्त्या भजति सुमनसो ऽ न्यांश् च निष्पक्षपातम् ।
धर्मा ।ऽ चार्यस्वरूपाः कतिचन दधते सम्प्रदायोक्तभेदान्,
धर्मद्वेषो ऽ त्र देशे स्पृशति न जनतां क्वा ऽ पि सामान्यरूपाम् ।।२०५।।

सुमनसः= देवान्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

देशे ऽस्मिन्नस्मदीये चलति बहुमता कालिकीयं व्यवस्था,
श्रूयन्ते किन्तु निन्दाः प्रतिपथमधुना धर्मविद्वेषमूलाः ।
धर्मद्वेषप्रसारं निजमतविततिं कर्तुकामेभ्य एभ्य
आयातेभ्यो नमो ऽस्तु, स्वजनपदमिमे सद्य एव प्रयान्तु ॥२०६॥

वंशक्रमाऽऽगतानि पदानि

मूलपाठः

ब्वामित्को नुन्को उधार गर्नु. कालु कबर्दारका सन्तानलाई कबर्दारि नछुटाउनु. दषिनको घाहा सिवराम वस्न्यात्का सन्तानलाई नछुटाउनु. भोटको घाहा कालुपाडेका सन्तानलाई नछुटाउनु.

संस्कृतच्छाया

भर्तृपिण्डस्य गुणो न विस्मरणीयः । अन्तर्वंशिकपदं खड्काकुलीनस्याऽन्तर्वंशिकपदभाजः कालोः सन्ततिः प्राप्नोतु । दाक्षिणात्यं सान्धिविग्रहिकपदं शिवरामवस्न्यातस्य सन्ततिः प्राप्नोतु । भोटविषयकं सान्धिविग्रहिकपदं कालुपाँडेः सन्ततिः प्राप्नोतु ।

पद्यमयी व्याख्या

मह्यं वृत्तिं कुटुम्बाऽऽभरणसमुचितां भूमिपालो ददाति,
जीवाम्यस्य प्रसादाद्, अहमपि करवाण्यस्य हर्षं हितं च ।
इत्थङ्कारं विचिन्त्य च्छलरहितमतिर् भर्तृपिण्डस्य हेतोर्
यो भृत्यश् चेष्टतेऽसौ रचयति सफलं लोकयुग्मं स्वकीयम् ॥२०७॥
स्वीयो भृत्यो न पीडाम् अनुभवतु, सदा सुस्थितो वर्ततां स,
इत्थं संचिन्त्य चित्तेऽनुभवति विधितः कष्टजातं स्वभृत्ये ।
तत् संहर्तुं प्रसक्तः स्वकरणसदृशं दूरदर्शी महीपः
सख्यं प्राप्नोति सङ्ख्ये निपुणजनकृतं स्वेऽपरस्मिंश् च कार्ये ॥२०८॥

स्वकरणसदृशम्= निजसाधनाऽनुरूपम्
सङ्ख्ये= युद्धे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आस्ते कः शौर्यचुञ्चुः, समरमुपगतं वीक्ष्य बेभीयते कः,
प्राज्ञः को, बालिशः को, नृपतिकृतिषु कश् चोष्णकः, शीतकः कः ।
एवं भृत्यान् परीक्ष्य स्वकृतिसमुचितं सत्कृतिं दण्डनं च
तेभ्यो यो जागरूको वितरति नृपतिस् तं न लक्ष्मीर् जहाति ॥२०९॥

शौर्यचुञ्चुः= शूरतया प्रसिद्धः

बेभीयते= नितरां बिभेति

बालिशः= मूर्खः

उष्णकः= अनलसः

शीतकः= अलसः

भोज्यं वस्त्रं च वासं स्वतनुविधृतयेऽपेक्षते सर्व एव,
गार्हस्थ्यं सेवमानः प्रभवति न जनस् तज्जचिन्तां विहातुम् ।
तत्साफल्यप्रसिद्ध्यै प्रभवति न धनं केवलं, किन्तु बुद्धिश्
चातुर्यं गेहनीतावपि च सुनियतं साधनं तत्प्रसिद्ध्यै ॥२१०॥

न्याय्यं मार्गं त्यजन्तः कुचरितनिरता दुर्जनाः स्वार्थहेतोर्
हन्तुं साधून् मनुष्यान् अपि कपटभरैर् जातु नो संकुचन्ति ।
भूयांसो लोकमान्या जनहितकृतये बद्धदीक्षा महीपा
लघ्व्या त्रुट्याऽपि हन्त स्वगृहजनितया नामशेषा बभूवुः ॥२११॥

शुद्धा नानोपधाभिः परिचितचरिताः प्राक्तनाः सद्मनुष्याः
प्रासादं भूमिभर्तुर् नृपतिमपि सदा सावधाना अवन्तु ।
पृथ्वीपालस्य हेतोर् विरचितमखिलं भोज्यवस्त्रादिजातं
तेषाम् अप्युत्तमस् तु प्रणिहितहृदयः संपरीक्षेत नित्यम् ॥२१२॥

उपधा= राजकीयानां पुरुषाणां राजभक्तेः परीक्षा

गुप्तान् सम्यग् विनीतान् विदधति मगरा बालकान् अस्मदीयान्,
अस्मद्गेहव्यवस्थापरिचितहृदयाः प्राय एते भवन्ति ।
कालुः खड्काकुलीनो व्यतनुत सुदृढां मद्गृहस्थां व्यवस्थां,
स्याद् अन्तर्वंशिकत्वाऽधिकृतपदमतः पुत्रपौत्रीणमस्य ॥२१३॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

साँगाचोकभवे रणेऽतिविकटे विध्वंसयन् वैरिणः
सेनानीः शिवराम ऐत् सुरपुरं बस्नेतवंशोद्भव :।
तत्पुत्रः पितृतुल्यवीर्यधिषणः केहेरसिंहाऽभिधो
निघ्नञ् शत्रुबलं महत् सतहुँजे युद्धेऽजहात् स्वान् असून् ॥२१४॥

ऐत्= अगच्छत्
धिषणा= बुद्धिः

निघ्नन्तः समरे रिपून् भुजबलात् षाड्गुण्यपद्याविदः
सेवन्ते शिवरामसिंहतनया मां भक्तिभाजोऽनिशम् ।
सेनानीर् अभिमानसिंह उदितां प्रज्ञां निजां दर्शयन्
सेनक्ष्मापतिभुज्यमानमजयद् देशं किराताऽभिधम् ।।२१५।।

पद्या= मार्गः

आसाते दक्षिणस्याम् अवधनरपतिस् ताम्रवक्त्राऽधिपश् च,
सेव्याऽस्माभिस् तु ताभ्यां सह नयसरणिः सूक्ष्मषाड्गुण्यनिष्ठा ।
जानीते दाक्षिणात्यं नृपतिनयपथं शैवरामी प्रसूतिः,
साऽस्मत्षाड्गुण्यमार्गे भजतु नियमतो दाक्षिणात्येऽधिकारम् ।।२१६।।

शैवरामी= शिवरामस्य अपत्यम्

आसीद् अस्मत्कुलीने नरपतितनये द्रव्यशाहे सुनीतिं
शौर्यं चाऽश्रित्य गोर्खां जयति विदधति क्ष्मापताम् आत्मवश्याम् ।
विप्रः पाँडेकुलीनः पटुतरधिषणो युद्धविद्याप्रवीणः
सख्यं कुर्वन् गणेशः, स्थिरसचिवपदं प्राप स द्रव्यशाहात् ।।२१७।।

कर्तुं: श्लाघ्यां व्यवस्थां बहुजनहितदां रामशाहस्य मन्त्री
सल्याने युद्धभूमावलभत शयनं कीर्तिशेषो गणेशः ।
वंशे विप्रस्य तस्याऽजनि कुशलमतिः क्षत्रियः कालुपाँडेः,
षाड्गुण्ये युद्धभूमावपि च समुचितं यो व्यधाद् मे सखित्वम् ॥२१८॥

भूभर्तुः कालुपाँडेर् अकृत मम हितं सर्वदा शुद्ध भक्त्या,
बह्वीनां स प्रजानां व्यधित हितमपि स्वीयया तीक्ष्णबुद्ध्या ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मल्लेशानां त्रयाणां समुदितपृतनां मर्दयन् कीर्तिपुर्यां
कालुः स्वर्लोकमाप्नोज् जगदतिसितया भासयन् स्वीयकीर्त्या ।।२१९।।

मल्लेशानां त्रयाणाम्= कान्तिपुरेश्वरस्य ललितपुरेश्वरस्य भक्तपुरेश्वरस्य

वर्तन्ते तत्तनूजा नयसमरविदो वंशराजाऽह्वयाऽद्यास्,
ते सम्यक् साधयन्ति प्रभुहितनिरताः स्वीकृतं कार्यभारम् ।
अस्माकं कूटमुद्राविषयजकलहो भोटभूपेन सार्धम्
आस्ते, बाह्यै र् निमित्तैर् अपि स कतिपयैर् वर्धनत्वं प्रयाति ।।२२०।।

आस्ते चीनाऽधिराजः सुविदितमहिमा रक्षको भोटभर्तुस्,
तस्माद् भोटेन सार्धं व्यवहृतिविधयेऽपेक्ष्यते नीतिवित्त्वम् ।
तत्रत्यं वृत्तमेते पटुतरधिषणा जानते कालुवंश्यास्,
तेनोदीच्योऽस्मदीयो भवतु नयपथः कालुवंश्याऽधिकारे ।।२२१।।

राजा स्वभृत्यान् स्वयं न हन्याद् नाऽपि घातयेत्

मूलपाठः

पाडे बस्न्यात् पंथ भैयाद मंग्रलाई मारातप् दिदा आलोपालो पालो गरि षान दिनु. ई मेरा नुन् गुन्का स्वन्ना सेवक हुन्. ईनीहरूको जीव जान्या बिराम गर्‍याको भया पनि आफुले नमार्नु. बरु मारातप दियेर लडाजीमा झोसिदिनु र जिव जोगाई आयो भन्या बढिया भयो. मरिगयो भन्या आफुले मार्नु अर्केबाट मारिदियाको बढिया हुन्छ. तव राजाले सेवकलाई घरमा नमार्नु.

संस्कृतच्छाया

पांडे–बस्न्यात–पन्थ–स्वबान्धव–मगराः पर्यायवृत्त्या राज्येऽधिकारभाजो वृत्तिभाजश् च भवन्तु । एते मम भर्तृपिण्डप्रत्युपकृतिपरा भक्ता भृत्याः सन्ति । उपरितनकुलीनः प्राणदण्डाऽर्हम् अपराधं कुर्वन्नपि जनो राज्ञा स्वयं न हन्तव्यो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नाऽपि घातयितव्यः। प्राणदण्डाऽर्हम् अपराधं कुर्वाणं तं जनम् अधिकारभाजं विधाय कठिनायां युद्धभूमौ प्रेषयेद् राजा। स स्वदेहं त्रात्वा युद्धभूमेः प्रत्यागच्छेच् चेच् शोभनम् एव। स युद्धभूमौ म्रियेत चेत् स्वेन हन्तव्यः परेण हत इति शोभनम् एव। अतो राजा स्वभृत्यान् स्वयं न हन्याद् नाऽपि घातयेत्।

पद्यमयी व्याख्या

पाँडे–बस्न्यात–पन्थाः प्रभुहितविषये जीवनं संत्यजन्ति,
वर्तन्तेऽस्मत्कुलीना धरणिपतिहितं साधयन्तः स्वबुद्धया।
मन्यन्ते भर्तृहेतो रणभुवि मगराः स्वं शरीरं तृणाय,
पञ्चैते मामकीना मति-कृति-सचिवा राज्यभारं वहन्ति ॥२२२॥

मति-कृति-सचिवाः= मतिसचिवाः कार्यसचिवाश् च

भृत्यानां कार्यशक्तिं समरनिपुणतां शेमुषीं भक्ततां च
संप्राप्ते कार्यकाले समुचितविधिना साऽवधानः परीक्षे।
पूर्वोक्ताः पञ्च चैते स्वकृतिषु सततं योग्यतां दर्शयन्ति,
न प्राप्ताः क्वाऽपि भृत्याः समुदितसुगुणास् तैः समाना मया तु ॥२२३॥

शेमुषीम्= बुद्धिम्

पञ्चानाम् एव तेषां मतिकृतिसलिलैः सिच्यमाना मदीया
नेतृत्वक्ष्मा प्रसूते मधुरफलमयं राज्यमेतद् विशालम्।
तस्माद् एते लभन्तां स्वकृतिसमुचितां सत्क्रियां राजकीयाम्,
एते पर्यायवृत्याऽधिकृतिसहचरीर् उच्चवृत्तीर् लभन्ताम् ॥२२४॥

क्ष्मा= भूमिः

अस्मद्राज्यस्य गुह्यं सकलमपि जनाः पञ्चवर्ग्या विदन्ति,
भिन्नेष्वेतेषु शत्रुश्रुतिविषयमियाद् गोपनीया कथा सा।
अस्मद्राज्याऽतिमात्रोपकृतिकरतया गुह्यसाधर्म्यतश् च
भूपैर् अस्मत्कुलीनैर् उपरिनिगदिताः पञ्चवर्ग्या न वध्याः ॥२२५॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तं मन्तुं चेद् विदध्याद् गदितकुलभवो यत्र दण्डो वधः स्याद्,
भूपा आगस्कृतं तं मम कुलजनुषः स्वाऽऽज्ञया नैव हन्युः ।
कस्मिंश्चिद् युद्धवह्नावधिकृतिसहितो दोषभाक् स प्रहेय,
आप्ताः केचिद् नियोज्याः समरसमुदितं बोद्धुमर्थं यथार्थम् ॥२२६॥

मन्तुः= आगः= अपराधः

युद्धक्षेत्रे प्रमथ्य प्रतिभटनिकरं त्रायमाणः स्वदेहं
प्रत्यागच्छेद् गृहं चेद् उपरिनिगदितो दोषमुक्तो भवेत् सः ।
संदीप्ते युद्धवह्नौ निजतनुहवनं चेत् स कुर्यात् तदाऽपि
हन्तव्ये स्वेन तस्मिन् परकरनिहते स्याद् अभीष्टं नृपस्य ॥२२७॥

परकरः= शत्रुहस्तः

अन्यायो रोधनीयः

मूलपाठः

तब राजाले ठुलो निजा निसाफ हेर्नु अन्याय मलुकमा हुन नदिनु.

संस्कृतच्छाया

राजा धर्माऽऽसनम् अध्यास्य सम्यग् व्यवहारान् पश्यतु, अन्यायं निरुणद्धु ।

पद्यमयी व्याख्या

मुग्धानां सज्जनानाम् अपि धननिचयं क्षेत्रगेहाऽऽदिकं च
व्याजान् नानाप्रकारान् विदधति कितवा आत्मसात् कर्तुकामाः ।
दुष्टानां दुश्चरित्रं सुजनधनहरं सर्वतो वीक्षमाणा
बेभीयन्ते शठेभ्यः सुचरितनिरता मुग्धचित्ताश् च लोकाः ॥२२८॥

कितवाः= छलरताः

बेभीयन्ते= भृशं बिभ्यति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्माभिर् जातु मन्तुः क्वचन न विहितो लेशमात्रोऽपि, तस्माद्
दुष्टैः संपीड्यमानान् कथमिव नृपतिर् नोद्धरेद् नो विवेकी ।
इत्याशाबद्धचित्ता धरणिपरिवृढद्वारमायान्ति लोका,
औदासीन्यं नृपाले श्रयति भजति तान् विस्मयः खेदपूर्णः ॥२२९॥

नः= अस्मान्

निश्चेतुं न्याय्यमार्गं प्रभवति नृपतिर् नो इदानीन्तनोऽयम्
इत्थं लोकप्रवादे प्रचलति जनता न्याय्यमार्गे दृढाऽऽस्थाम्
धत्ते न स्वीयचित्ते, कुचरितनिरता भ्रष्टलक्ष्या क्रमेण
साऽऽत्मानं भूमिपालं निजमपि पतितं लोकयुग्मे करोति ॥२३०॥

न्यायं निष्पक्षपातं निजजनपदजाः सर्वं आसादयन्तु,
दण्डं दोषाऽनुसारं भजतु कुचरितो लौकिकानां समक्षम् ।
एवं भावं दधानो नृपतिरवहितः शीतकत्वं विहाय
कार्यार्थिभ्यः प्रयच्छेत् समयसमुचितं दर्शनं द्वारभाग्भ्यः ॥२३१॥

शीतकत्वम्= अलसत्वम्

धर्माऽऽचारव्यवस्थाः स्मृतिषु निगदिता लौकिकीश् चाऽपि सम्यग्
विद्वद्भिर् दृष्टकार्यैर् व्यवहृतिपटुभिः पारिषद्यैः समेतः ।
अर्थिप्रत्यर्थियुग्मं धरणिपरिवृढः कारयित्वा समक्षं
पश्येद् धर्माऽऽसनस्थो व्यवहृतिविषयान् कामलोभाऽदिहीनः ॥२३२॥

पारिषद्यैः= सभासद्भिः
अर्थी= वादी
प्रत्यर्थी= प्रतिवादी

उत्कोचग्राही दण्डनीयः

मूलपाठः

निन्नानिसाप बिगान्र्या भन्याको घुस् दिन्या र घुस षान्या ईन दुईको ता धन जिव गरिलियाको पनि पाप छैन. ई राजाका महासतुर हुन्.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

उत्कोचं दाता ग्रहीता चाऽन्यायं प्रसारयत। एतौ कण्टकरूपी स्तः। एतयोर् धनं प्राणांश् चाऽपि हरन् राजा दोषभाग् न भवति।

पद्यमयी व्याख्या

आदत्ते कार्यिकाद् योऽधिकरणपुरुषो द्रव्यमस्मै च दत्ते
यः कार्यी, तौ विधत्तः समकुकृतमुभौ न्यायमार्गाद् अपेतम्।
प्राणान् रिक्थं च सर्वं प्रसभमभिहरन्नेतयोस् तु क्षितीशो
दोषं नाऽऽप्नोति कञ्चित् कुचरितरतयोर् एतयोः कण्टकत्वात् ॥२३३॥

कार्यिकः = कार्यी = कार्याऽर्थी
रिक्थम् = धनम्

सैनिका आनुकूलिकं भोजनपर्याप्तं क्षेत्रखण्डं वेतनत्वेन लभन्ताम्

मूलपाठः

उप्रान्त॥ जढ कुरो राजालाई चाहोन्या सिपाहिहरुको घर षेत् मिलाईदिनु र मल् जल् गर्छन् र डुबौ बोटि भित्र हाल्न पाउछन् र कबिलाको निर्फिक्रि हुन्छ. ढोकामा भया पनि गौडामा भया पनि सिपाहिहरूको छाति बलियो रहन्छ.

संस्कृतच्छाया

अथ राज्ञः प्रधानम् अङ्गं सैनिकाः। सैनिकाः स्वगृहस्याऽनुकूलिकं क्षेत्रखण्डं वेतनत्वेन लभन्ताम्। तस्मिन् क्षेत्रे ते कृष्युपयुक्तं सेतुबन्धाऽऽदिकं कुर्वाणाः कर्षकत्वेन स्वामित्वेन च लभ्यौ भागधेयौ लब्ध्वा स्वगृहजनान् भोजयितुं समर्था भवन्ति। गृहचिन्तारहिताः सैनिका राजधान्यां राष्ट्रियेषु दुर्गेषु च योद्धुं समर्था भवन्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमयी व्याख्या

कोषं कुप्यं गवाश्वाऽऽदिकमपि सकलं हर्तुकामाः सशस्त्रा
जायन्ते चौरसंघा निहतबहुजना बद्धवैराः प्रजाभिः ।
चौरेभ्यस् त्रस्तचित्ता नरपतिशरणं प्राप्तुकामाः प्रजाः स्वा
यो न त्रायेत राजा, कृशतरयशसो भूपता स्यात् क्षताऽस्य ॥२३४॥

कोषम् = सुवर्णं रजतं च
कुप्यम् = कोषाद् अन्यद् द्रव्यजातम्
भूपता = राज्यम्
क्षता = नष्टा

स्वीयाम् उल्लङ्घ्य सीमाम् अपरजनपदं प्राप्य तत्रत्यभूमिं
यावच्छक्ति स्वकीयां रचयितुमनसो भूमिपाला भवन्ति ।
सीम्ना संबद्धभूमिर् धरणिपतिरतो भण्यते नीतिकारैः
शत्रुः, शत्रोर् नृपालाद् भवतु नरपतिः साऽवधानः सदैव ॥२३५॥

भूपालश् चौरसंघान् दमयितुमनिशं तिष्ठतां स्वीयशक्तौ,
रोद्धुं प्रत्यर्थिसीमाप्रसरणमपि च प्रक्रमेत स्वशक्त्या ।
कार्यद्वन्द्वं नृपस्य प्रमुखतममिदं गीयते नीतिकारैर्,
एतद्द्वन्द्वं न सिद्ध्येद् यदि तु नहि भवेत् स्थायिनी वाहिनी स्वा ॥२३६॥

तिष्ठतां स्वीयशक्तौ = स्वशक्तिं स्थैयत्वेन गृह्णातु
वाहिनी = सेना

वृत्तेर् हेतोर् मनुष्या रणविधिनिपुणा आश्रयन्ते महीशं,
ते लब्ध्वा सैनिकत्वं धरणिपरिवृढात् क्षेत्रखण्डं लभन्ते ।
योद्धृभ्यः क्षेत्रखण्डं निजगृहनिकटं स्वाऽऽनुकूल्येन देयं,
स्वामित्वात् कर्षकत्वाद् अपि च समुदिते द्वे फले ते लभन्ताम् ॥२३७॥

स्वीये केदारखण्डे सुविहितकृषयो वेतनत्वेत लब्धे
सस्येनोत्पत्तिभाजा निजसदनजनान् सैनिकाः पोषयन्तु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुष्टे स्वे भृत्यवर्गे निजगृहगतया चिन्तया मुच्यमाना
राजद्वारे च दुर्गेऽपि च नृपतिकृतौ नो भटाः संकुचन्ति ॥२३८॥
केदारः = क्षेत्रम्

सांयुगीनाः पदवृद्धिं लभन्ताम्

मूलपाठः

पजनि गर्दामा पनि सये नालका कंम्पनी जमाउनु र र सये नालका सुबेदार चार पाच लडाईमा जस पाई आयाका यस्ता आफुले जाचि सुबेदार हाल्नु सुबेदारले पनि सातपगरि दुई चार बाढ षायाका यस्ता सातपगरि हाल्नु. सातपगरिले स्वह्र हुदा हाल्दा आफुसित मर्ने मान्यं जाची १६ हुदा हाल्नु. १६ हुदाले पनि आफुसित मर्ने मान्यं जाची सिपाही हालि आफ्ना आफ्नापट्टि भर्ना गर्नु.

संस्कृतच्छाया

प्रतिसैनिकवर्गं शतम् अग्निशस्त्रभाजः सैनिका भवन्तु। चतुःपञ्चेषु युद्धाऽङ्गणेषु लब्धकीर्तिं सुयोधं राजा स्वयं परीक्ष्य वर्गस्य शासितारं पत्त्यध्यक्षं नियुङ्क्ताम्। दृष्टद्वित्रयुद्धान् भटान् परीक्ष्य पत्त्यध्यक्षः सप्त मुख्यान् नियुङ्क्ताम्। सप्त मुख्याः स्वैः सह युद्धभूमौ जीवं वा पातयामः कार्यं वा साधयाम इति गर्जतो भटान् परीक्ष्य षोडश नायकान् नियुञ्जताम्। षोडश नायकाः स्वैः सह युद्धभूमौ जीवं वा पातयामः कार्यं वा साधयाम इति गर्जतः शूरान् परीक्ष्य भटत्वे नियुञ्जताम्। एवं वर्गः सुघटितो भवतु।

पद्यमयी व्याख्या

पद्गैर् वह्न्यस्त्रभाग्भिर् भवतु शत १०० मितैः सैनिकैर् वर्ग एकः,
पत्त्यध्यक्षत्वमाप्तः प्रकटितगरिमा सैनिकः शास्तु वर्गम्।
विक्रान्तं शौर्यचुञ्चुं बहुषु च समरेष्वाप्तकीर्तिं सुयोधं
पत्त्यध्यक्षं विदध्यात् स्वयमवनिपतिस् तद्गुणान् संपरीक्ष्य ॥२३९॥
शौर्यचुञ्चुम् = शूरत्वेन प्रसिद्धम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्थाने युद्धेऽपसारे विहितपरिचयान् द्वित्रयुद्धाऽङ्गणेषु
पत्त्यध्यक्षः सुयोधान् स्वयमथ कुरुतां सप्त[७] मुख्यान् परीक्ष्य ।
युद्धे शत्रून् निहन्तुं स्वयमपि नशितुं तत्परान् स्वेन सार्धं
सुज्ञातान् सप्त[७]मुख्या विदधतु सुभटान् नायकान् अष्टि[१६]संख्यान् ।।२४०।।

संग्रामे स्वेन सार्धं रिपुबलमसितुं प्राणमोहं विहाय
सक्तान् विक्रान्तचित्तान् रणविधिनिरतान् नायका अष्टि[१६]संख्याः ।
संगृह्णीयुः स्ववर्गेऽधिगतभटपदांस् तान् विदध्युः परीक्ष्य,
वर्गे वह्लचस्त्रभाजः प्रभुहितनिरताः सांयुगीना भवन्तु ।।२४१।।

असितुम् = प्रक्षेप्तुम्

आयुधीया जातयः

मूलपाठः

पट्टी पट्टिमा सिपाहि पनि षस् मगर गुरुं ठकुरि ईनै चार जात मात्रै बिचोला गरिहाल्नु र तर्वार पर्दा साह्रो हुन्छ. लुहा च्यापन्या पनि इनै चार जात मात्रै हुन् र त(र)वार पर्दा साह्रो हुन्छ र वैरि त क्या इन्द्रको आसन् पनि डगाईछ.

संस्कृतच्छाया

सैनिकानां संघट्टने विधीयमाने खशा मगरा गुरुङ्गाष् ठकुरय इति चतसृषु जातिषु जाता मानवा एव खण्डे खण्डे शबलीकृत्य सैनिकत्वेन नियोज्याः। अत्राऽयुधीया जातय एताश् चतस्र एव सन्ति । एताभिश् चतसृभिर् जातिभिः संघट्टिता सेनारणभूमौ बलिष्ठान् अपि शत्रून् कम्पयेत् ।

पद्यमयी व्याख्या

विद्यां शिल्पाऽदिकं च स्वकुलसमुचितं शैशवाद् एव मर्त्याः
कर्णाभ्यां लोचनाभ्याम् अपि च विदधते मानसे स्वे निसर्गात् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तस्माद् आसेव्यमाने निजकुलपुरुषैर् वर्तने मानवानां
स्वल्पा ।ऽयासेन वृद्धिः प्रविशति, सुफलं ते लभन्ते च तत्र ॥२४२॥
वर्तने = जीविकायाम्

ठकुरयो गुरुङा मगराः खशाः
स्वकुलजं दधते रणनैपुणम् ।
उपरिभाषितजातिचतुष्टये
रणमुखे पटुता मयकेक्षिता ॥२४३॥

वर्तन्ते सांयुगीना उपरिनिगदिता जातयोऽमूश् चतस्रः,
खण्डे खण्डे नियोज्या उपरिनिगदिता मानवाः सैन्यवर्गे ।
एवं संघट्टयमाना रणविधिकुशलैर् मानवैर् अस्मदीया
सेना संग्रामभूमौ रिपुजनहृदयं कम्पयेद् विक्रमेण ॥२४४॥

शस्त्रसंग्रहः

मूलपाठः

हजारौ धना हजारी पयर्काला हजारौ षुडा हजारौ तोप भया इन्द्रको आसन पनि डगाईछ.

संस्कृतच्छाया

सहस्राणि धनूंषि, सहस्राणि वह्निमयगुलिकाः प्रक्षिपन्ति नलिकारूपाणि शस्त्राणि, सहस्राणि खड्गाः, सहस्राणि वह्निमयस्थूलगोलान् प्रक्षिपन्त्यः शतघ्न्यो यस्य स्युः, स बलिष्ठान् अपि रिपून् वशीकुर्यात् ।

पद्यमयी व्याख्या

चापाः खड्गाः शतघ्न्यो दहनजगुटिकाः प्रक्षिपन्त्यायुधानि
यत्पार्श्वे स्युः सहस्राण्यरिजनहृदयं कम्पयन् सर्वदा सः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कुर्यात् स्वीयप्रतापात् स्खलितमिव शचीनाथसिंहासनं च,
श्रेष्ठानाम् आयुधानां धरणिपतिरतः संग्रहे यत्नवान् स्यात् ॥२४५॥
शचीनाथसिंहासनम् = इन्द्रस्य सिंहासनम्

योद्धारस् तत्सहायकाश् च

मूलपाठः

लडाञीमा पनि हान्न्या र सब दिन्या ई दुवै बरोबर हुन्. जागिर दिदा पितल् दिदा दुवैलाई बरोबर दिनु.

संस्कृतच्छाया

युद्धे शत्रून् हन्तारः सैनिकाः, विविधैर् अन्यैः प्रकारैः सहायकाश् च समम् उपकुर्वन्ति । अतो राजा वैतनिकत्वप्रदाने भूमिप्रदाने च तेभ्य उभयेभ्योऽपि समानम् अधिकारं दातुम् अर्हति ।

पद्यमयी व्याख्या

गत्वा संग्रामभूमिं रिपुबलमसितुं दर्शयन् विक्रमं स्वं,
स्थित्वाऽन्यत्र प्रदेशे समरभुवि गतान् साधु पुष्णञ् जनश् च ।
तुल्यं भारं वहन्तौ सममुपकुरुतः स्वप्रयासैर् जिगीषुं,
तस्मात् तौ प्राप्नुयातां सममवनिपतेर् वार्ततां वेतनं च ॥२४६॥
वार्तः = वृत्तिभुक्

युद्धे हतस्य स्वसैनिकस्य गृहजनाय राजा जीविकां ददातु

मूलपाठः

मन्यो भन्या उसका छोरा षुडा हान्न्या नहुन्ज्याल् मरवट् दिनु. षुडा हान्न्या भयापछि जागिरमा उकालिदिनु र

युद्धे स्वसैनिके हते कवचहरे तत्पुत्रे चाऽसति तद्गृहजनाय राजा वृत्तिं ददातु । कवचहरदशां प्राप्तस् तत्पुत्रः सैनिकत्वेन वृत्तिं लभताम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गन्तुः संग्रामभूमिं रिपुबलमसितुं तस्थुषो वीरलोकं
बालाऽपत्याऽऽदिकानां भवतु वसुमतीपालको वृत्तिदाता ।
विक्रान्तस्याऽस्य सूनुः कवचहरदशाम् आप्तवान् सैनिकोऽस्तु,
दर्शं दर्शं स्वशौर्यं रणभुवि लभतां पैतृकं गौरवं सः ॥२४७॥

वसुमतीपालकः = राजा

तातो माता च वृद्धौ, शिशुरपि तनयो, गेहिनी बालपुत्रा,
तेषाम् एकोऽहमासे कथमपि धरणौ जीवनत्राणहेतुः ।
संप्राप्ते कालवक्त्रं मयि यमसदनं तेऽपि सर्वे व्रजेयुर्,
इत्थं चिन्तानिमग्नो भवति नहि जनः साहसं कर्तुमीशः ॥२४८॥

यमसदनं व्रजेयुः = म्रियेरन्

हन्यां चेच् शत्रुवर्ग्यान् रणभुवि विपुले कीर्तिलक्ष्म्यौ लभेय,
चेद् हन्येय द्विषद्भिः क्षितिपतिततनुः प्राप्नुयां स्वर्गलोकम् ।
मत्पुत्राऽऽद्याश् च वृत्तिं निजतनुधृतये राजकीयां लभेरन्–
नित्याकारे विचारे हृदि सति समरे शूरताम् एति योधः ॥२४९॥

वीराः सन्तु स्वसैन्याः, क्षपितरिपुबलाः सन्तु ते युद्धभूमौ,
श्रुत्वाऽऽस्मत्सैन्यशक्तिं भयचकितहृदो दस्यवः सन्तु नित्यम् ।
एतां चिन्तां दधानो धरणिपरिवृढो युद्धभूमौ हतस्य
सैन्यस्य स्वस्य गेहं क्षुधितपरिजनं नैव कुर्वीत जातु ॥२५०॥

दस्यवः = चौराः शत्रवश् च

राज्ञा विवेकिना भाव्यम्

मूलपाठः

राजाले बिबेक राषीदिया देसदेसका सिपाहि पनि आसा राषी आउँन्छन् र यस्व भया तरवारीया सिपाहि हात लाग्छन्.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

राजनि विवेकभाजि सति दवीयसोऽपि देशात् सैनिका आशया तस्य सेवायै समुपगच्छन्ति । अतः स विवेकी भूपः कृतहस्तान् योधान् प्राप्तुं प्रभवति ।

पद्यमयी व्याख्या

पृथ्वीपाले विवेकाद् विदधति गुणिनां सत्कृतिं सैनिकानां
शस्त्राजीवेषु कीर्तिः प्रसरति विमला दूरदेशेऽपि तस्य ।
दूराद् दूराच् च कीर्तिश्रुतिसमुपगतान् भूयसः शौर्यचुञ्चून्
शस्त्रप्रावीण्यभाजः समरभुवि सखीन् सैनिकान् विन्दते सः ॥२५१॥

विन्दते = लभते

राज्ञः सारः सैनिकाः प्रजाश् च

मूलपाठः

राजाका सार भन्याको सिपाहि र रैतिहरु हुन्. राजा चतुर भया सिपाहि र रैति हातहात गरिराख्नु र हुल्फुल् हुन पांउदैन.

संस्कृतच्छाया

राज्ञः सारो नाम सैनिकाः प्रजाश् च । चतुरो राजा सैनिकान् प्रजाश् च रञ्जयतु । एवं सति लोकविप्लवो निरुद्धो भवति ।

पद्यमयी व्याख्या

मुख्यः सारः पदार्थो भवति नरपतेः सैनिकाश् च प्रजाश् च,
भूपश् चातुर्यशाली न वहतु नहि तद्रञ्जनाय प्रयत्नान् ।
सैन्ये लोके च रक्तेऽनुसरति नियमान् राज्यविध्वंसहेतुर्
मात्स्यो न्यायोऽपयाति, प्रमुदितमनुजैर् गीयते भूपकीर्तिः ॥२५२॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सैनिका उद्धर्षणीयाः

मूलपाठः

सिपाहि भन्याको तिर्षारिराखनु. तिर्षारिराख्याका सिपाहि कसैका मलाजामा पस्तैनन् र आफ्नु काज फत्य हुन्छ.

संस्कृतच्छाया

सैनिका उपधाभिः परीक्षणीया उद्धर्षणीयाश् च। एवं सति ते परेषाम् उपजापं न सहन्ते, स्वकार्यसिद्धिर् भवति।

पद्यमयी व्याख्या

सम्यक् कार्यं विधत्ते प्रभुहितविषये वर्तते च प्रशक्तो
यो भृत्यः प्राप्नुयात् स स्वकृतिसमुचितं वेतनं सत्कृतिं च।
आलस्यं संविधत्ते प्रभुहितमपि नो कर्तुमीष्टे स्वशक्त्या
यो भृत्यः प्राप्नुयात् स स्वकृतिसमुचितं दण्डनं न्यक्कृतिं च ॥२५३॥

न्यक्कृतिम् = तिरस्कारम्

इत्थं संचिन्त्य चित्ते निजभटचरिते दत्तचक्षुर् नृपालस्
तेषां चारित्रशुद्धौ समुचितविधिना वर्ततां जागरूकः।
यत्सैन्याः सच्चरित्राः परजनविहितं नोपजापं सहन्ते,
संग्रामे तं जयश्रीर् अपि करुणदृशा वीक्षते साऽनुरागा ॥२५४॥

दुर्गपालानां नियुक्तिः

मूलपाठः

गुरुं मगर बानुञ्रादा भैयाद भारादार मिर उमराउ परवर पुराना पुराना जाची धुंडा गौडामा राखनु.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

गुरुङ्गा मगरा नृपतिकुलजाः स्वबान्धवा राज्यव्यवस्थाधिकृताः सेनाधिकृताः षट्कुलसंज्ञवंशजाश् च दृष्टक्रियाः परीक्षिताश् च जना दुर्गपाला विधेयाः ।

पद्यमयी व्याख्या

गुरुङ्गा मगरा नृपालवंश्याः स्वकुलीनाः प्रमुखाऽधिकारभाजः ।
पृतनाऽधिकृताः कुलक्रमाऽऽप्ता मनुजाः षट्कुलसंज्ञवंशजाश् च ।।२५५।।

उक्तानां मानवानां रणविधिनिपुणा दृष्टभूरि क्रियाश् च
शुद्धा नानोपधाभिर् नृपतिहितरता ये जनाः संभवेयुः ।
तान् आप्तान् एव पुंसो धरणिपरिवृढो दुर्गपालान् विधाय
सम्यक् त्रायेत राष्ट्रं रिपुजनहृदयं कम्पयन् सैन्यशक्त्या ।।२५६।।

तिरोजनपदा महत् पदं न लभेरन्

मूलपाठः

पुरुव पछिम्का खस बाहुनलाई दरबारमा पैठ् हुनु नदिनु. क्यान भनेला बाहिडा मान्छ्याले दरबारमा थिथिति गराउछन्.

संस्कृतच्छाया

प्राच्याः प्रतीच्याश् च खसा ब्राह्मणाश् च महान्तं राज्याधिकारं न प्राप्नुयुः । किमिति चेत् तिरोजनपदा राज्यव्यवस्थाम् आकुलीकुर्वन्ति ।

पद्यमयी व्याख्या

भूयांसः सन्ति भूपा दिशि दिशि धरणिपालवंशप्रसूता
द्यूतस्वापाऽबलासु प्रणिहितमनसो दानयुद्धप्रहीणाः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा श्रुत्वाऽस्मदीयं विभवमनुदिनं वर्धमानं नृपास् ते
भायं भायं लषन्ति प्रतिघपरिवृता अस्मदीयं विनाशम् ॥२५७॥

प्रतिघः = क्रोधः

भूपाः प्राच्याः प्रतीच्या अपि भयविवशा युञ्जते गूढरूपान्
स्वान् दूतान् विप्रवंश्यान् खसकुलजनुषश् चाऽस्मदीयक्षयाय ।
अस्मद्राज्यव्यवस्थां परजनपदजास् ते छलाद् दूषयेयुस्
तस्मात् तेषां प्रवेशो नहि भवतु रहो–राजकृत्येऽस्मदीये ॥२५८॥

रहो—राजकृत्ये = गोपनीयायां राज्यव्यवस्थायाम्

राजकीयं शासनं राजा स्वयं लेखयेत्

मूलपाठः

राजाको हुकूम जफत गरि राखनु.

संस्कृतच्छाया

राजकीयं शासनं राजा स्ववशीकरोतु ।

पद्यमयी व्याख्या

आज्ञा राज्ञो नियोक्तुं प्रभवति सकला राज्यनिष्ठा व्यवस्थाः,
शुश्रूषन्ते समस्ता अधिकृतपुरुषास् तां जनाः कार्यिणश् च ।
संप्राप्ते कार्यकाले नरपतिवचनं लिप्समाना जनाश् चेत्
तद्वाक्यं नो लभेरञ् जनपदमखिलं निष्क्रियत्वं श्रयेत ॥२५९॥

शुश्रूषन्ते = श्रोतुम् इच्छन्ति

लिप्समानाः = लब्धुम् इच्छवः

उत्पन्नं कार्यजातं भवति जनपदे यत्र यत्र स्वकीये,
स्वीयाम् आज्ञां प्रदातुं प्रभवति न नृपस् तत्र तत्रैव गन्तुम् ।
सर्वाः स्वाऽऽज्ञा निधातुं स्वमनसि सततं नैव शक्नोति भूपः,
सर्वाऽऽज्ञा राजकीयाः सततमधिकृता नो कृतौ संस्मरन्ति ॥२६०॥

कृतौ= कार्ये समागते

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पत्रा।ऽदौ बद्धलेखा किमपि च दधती लक्षणं राजकीयं
भूपाला।ऽज्ञा प्रजानां मनसि दृढतरं प्रत्ययं संतनोति ।
सैवा।ऽज्ञा शास्ति लोकान्, इति नयनिपुणैः शासनं कथ्यते सा,
तेषां दृष्टौ शरीरी न भवति नृपतिः शासनं ह्यस्ति भूपः ।।२६१।।

लक्षणम्= चिह्नम्
प्रत्ययम्= विश्वासम्

पत्रा।ऽदौ बद्धलेखा किमपि च दधती लक्षणं राजकीयं
राजा।ऽज्ञा शास्ति लोकान्, धरणिपतिरतो लेखयेत् साऽवधानः ।
तादृक् पत्रं, प्रमादं भजति नरपतौ लेखने शासनस्य
लोकः पर्याकुलत्वं भजति, च नितरां दैन्यमाप्नोति राष्ट्रम् ।।२६२।।

योग्योऽन्तपालो राष्ट्रं रक्षति वर्धयति च

मूलपाठः

मैले तिं थुम्का बह्लाहा उमरांउलाई ईन्द्रवज् तुल्याई राष्याथ्या. नगरा निसान पनि दिई राष्याथ्या. बाह्लदिलको गाडो(ठो) बांधी दियाको थीयो र सल्यानि लिग्लीग् धार्दिका मुहुडामा जाहा जाहा काज गर्थ्यो. फत्य गर्थ्या र यो अंस्वर्जे गऱ्याको हो.

संस्कृतच्छाया

सल्याने लिगलिगे धादिङे च स्थितानां दुर्गपालानां दुर्गोत्तरेशो मम कृपया वार्षिकीं चत्वारिंशदुत्तरशतद्वयरूप्यकात्मिकां वृत्तिं लभते स्म। सपटहरवेण सैनिकवन्दनेन ध्वजेन च स सदक्रियत । उपरिकथितेषु प्रदेशेषु जायमानासु रणक्रियासु स शत्रुप्रयोगान् स्वयं विफलयति स्म । तदुद्योगेन ममैषा श्रीर् अजायत ।

पद्यमयी व्याख्या

पाश्चात्त्याः सौम्यदिक्स्था लिगलिगशिखरे सनिकैर् वर्तमानैस्
त्रायन्ते स्म प्रदेशाः, ककुभि सुरपतेर् वर्तमानाः प्रदेशाः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

योधैः सल्ल्यानकोटे विहितवसतिभिस् त्रायमाणा अभूवन्,
याम्याः प्राच्याश्च भागाः कतिचन सुभटै रक्षिता धादिङस्थैः ।।२६३।।

सौम्यदिक्स्थाः= उदीच्याः
ककुभि सुरपतेर् वर्तमानाः= प्राच्याः
याम्याः= दाक्षिणात्याः

भागत्रय्या विभक्तं प्रथमगदितया गोरखाराज्यमासीद्,
एकैको दुर्गपालः प्रणिहितहृदयो रक्षति स्म स्वभागम् ।
निर्दिष्टं दुर्गपालत्रितयमपि निजे योजयन् कार्यजाते
ख्यातो दुर्गोत्तरेशो रणविधिनिपुणो गोरखाराज्य आसीद् ।।२६४।।

आसीद् दुर्गोत्तरेशः स मम बहुमतो, विंशतिं रूप्यकाणि
मासे मासे स आप्नोत् सहपटहरवं वन्दनं केतनं च ।
यस्मिन् भागे रिपूणाम् अजनि भयमसौ तत्क्षणं तत्र गच्छन्
निघ्नञ् शत्रून् समस्तान् अकृत च धरणीं निःसपत्नां मदीयाम् ।।२६५।।

सहपटहरवं वन्दनम्= सैनिकैः क्रियमाणं तूर्यध्वनिपूर्वकं नमस्कारम्
केतनम्= ध्वजम्

वीरस्यैतस्य शौर्ये स्फुरति जनपदे मामकीने सपत्नाः
क्षेप्तुं पादान् अशक्ता अजनिषत शनैः साध्वसाऽऽक्रान्तचित्ताः ।
गुप्ते राज्ये स्वकीये जनपदमपरं वाहिनी चाऽस्मदीया—
ऽऽशक्नोद् निःशङ्कमेतुं सकरुणनयनाऽऽस्मासु लक्ष्मीर् अभूच् च ।।२६६।।

राजा पितृपैतामहान् उपधाशुद्धान् भृत्यान् पार्श्ववर्तिनो विदध्यात्

मूलपाठः

आफ्ना घरका पुराना सेवक जाची हजूरमा हरोदम् राखी दरोबस्त बाधि घर बलियो राष्नु. यस्व भया दरबार बलियो रहन्छ.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

पितृपैतामहान् स्वभृत्यान् परीक्ष्य राजा स्वपार्श्ववर्तिनः करोतु । सम्यग् विनीतैस् तै राजप्रासादव्यवस्थां सम्यक् कारयतु राजा । एवं सति राज्यव्यवस्था दृढा भवति ।

पद्यमयी व्याख्या

भृत्यान् वंशक्रमाऽऽप्तान् परिचितविनयान् राजगेहस्थकृत्ये
सम्यग् नानोपधाभिः प्रणिहितहृयः संपरीक्षेत भूपः ।
प्रज्ञा शौर्यं च भक्तिस् त्रितयमपि भवेद् वर्तमानं च येषु,
तान् एव स्वीयभृत्यान् स्वसविधवसतीन् भूमिपालो विदध्यात् ॥२६७॥

देशः कालश् च कृत्यं भवतु विनियतं राजगेहे समेषां
भृत्यानां, साऽवधाना विदधतु च यथादेशकालं कृतीस् ते ।
आप्तैर् भृत्यैः प्रवीणैः सततमवहितैः रक्षितं यस्य गेहं,
तस्मिन् बद्धाऽनुरागा भवति नरपतौ राजलक्ष्मीश् चिराय ॥२६८॥

समेषाम्= सर्वेषाम्

सैनिकाः प्रजाश् च परोपजापसहा न भवेयुर् इति राजा चिन्तयेत्

मूलपाठः

राजाको चतुराई भया सिपाही रैति हात गरि राष्नु. कसैको मलाजापछि गुणपछी लाग्नु नदिनु. नुनपछि लाउनु.

संस्कृतच्छाया

चतुरो राजा सैनिकान् प्रजाश् च रञ्जयतु । परेषाम् उपजापं ते न शृणुयुः, भर्तृपिण्डस्य प्रत्युपकारपराश् ते भवेयुर् इति राजा चिन्तयेत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पद्यमयी व्याख्या

लोकानां सैनिकानाम् अपि धरणिपतिश् चित्तवृत्तीः परीक्ष्य
कुर्यात् तद्रञ्जनाय प्रणिहितहृदयः सर्वदैव प्रयत्नान् ।
लोकश् चक्राणि, यन्ता धरणिपरिवृढः, सैनिकाः सन्ति वाहा,
राज्याऽऽख्यः कश्चिदास्ते रथ, इति मतिमांश् चिन्तयेद् भूमिपालः
॥२६९॥

स्वीयाः सैन्याः प्रजाश् च क्वचन न शृणुयुर् वैरिवर्गोपजापान्,
राजद्वारे रणे च प्रभुहितविधये ते सदा सन्तु सक्ताः ।
विद्रोहो जातु मा भूत् क्वचन जनपदे स्वे भटानां प्रजानाम्,
इत्थं संचिन्त्य राजा विरचयतु च तद्रञ्जनाय प्रयत्नान् ॥२७०॥

शुद्धरजयतमयं रूप्यकं विधेयम्

मूलपाठः

उप्रान्त टक्सार पनि चोषो चलाउनु.

संस्कृतच्छाया

अथ टङ्कशालायां शुद्धा एव मुद्राः कार्याः ।

पद्यमयी व्याख्या

भूपाला मल्लवंश्या विलसनविषयैर् नाटचसंगीतकाऽऽद्यैः
साम्राज्यश्रीविलासान् मुगलकुलजनीन् अन्वकुर्वन् क्षितीशान् ।
अल्पाऽऽया मल्लभूपा व्ययविपुलतया रिक्तकोषत्वमाप्य
चिन्ताग्रस्ता बभूवुर् निजजनभरणे प्रत्यहं संविधेये ॥२७१॥

क्षेत्रं विक्रीणते स्म व्यवहृतिविषये क्षीणकोषाः क्षितीशाः,
पूर्वं मल्ला नृपाला अपि धनरहितास् तत् तथा कुर्वते स्म ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अन्त्या मल्ला नृपालाः प्रतिदिवसमिव क्षीयमाणप्रदेशाः
क्षेत्रं विक्रेतुकामाः स्वहृदभिलपितान् ग्राहकान् नाऽलभन्त ॥२७२॥

अन्तर्भूयिष्ठताम्राः सुविहितरजताऽलेपसंछादिताऽङ्गास्
ते भूपाः क्षीणकोशा जननयनमुषोऽकारयन् कूटमुद्राः ।
मुद्राभी राजतीभिर् हठकृतसमतास् ताम्रजाः कूटमुद्राः
स्वीकुर्वन्ति स्म लोका निजजनपदजा राजभीत्या कथञ्चित् ॥२७३॥

आनीयन्ते पदार्थाः परजनपदतो भूरि कष्टं विषह्य,
शुद्धं रूप्यं सुवर्णं किमुत नियमतस् तत्र मूल्यं प्रदेयम् ।
मुद्राभिस् ताम्रजाभिः कथमिव समतां हेमरूप्ये वहेताम्,
इत्युक्त्वा सार्थवाहा निरुरुधुरखिलां बाह्यपण्या वणिज्याम् ॥२७४॥

बाह्यपण्याः= बाह्यं बहिर्देशे भवं पण्यं विक्रेयं वस्तु येषां ते

ताम्राऽर्घो रूप्यमूल्याद् भवति लघुतरस्, तेन लाभस्य हेतोः
शिल्पज्ञाः कूटकारा अकृषत बहुलास् ताम्रजाः कूटमुद्राः ।
भूपालैः कार्यमाणा इव निपुणतरैः शिल्पिभी रच्यमाना
भूयस्यः कूटमुद्रा अजनिषत, भिदा काऽपि नाऽभूत् तदीया ॥२७५॥

मन्दं मन्दं विलोपं रजतविरचिताः शुद्धमुद्रा अगच्छन्,
भूयिष्ठाः कूटमुद्राः प्रतिदिनमभवन् वर्धमानाः क्रमेण, ।
भोज्यं वस्त्रं मनुष्यस्थितिकरमभवद् मूल्यवृद्धया दुरापं,
दैन्यं व्याप्नोत् प्रजानां हृदयमतितरां, तोष आसीद् विलीनः ॥२७६॥

आस्ते लोके महाऽर्घः, शिशुजनबहुला आस्महे, वेतनेन
स्वल्पेनाऽनेन कृत्यं कथमिव गृहजं प्रत्यहं साधनीयम् ।
अस्माकं वेतनं स्यात् समयसमुचितं, येन जीवेम राजन्-
नित्थं भृत्याः पुराणा अपि नृपमवदन् पीडयन्त प्रकामम् ॥२७७॥

प्राभूवन् मल्लवंश्या धरणिपरिवृढाः कूटमुद्रासमुत्थान्
नैतान् दोषान् निरोद्धुं कथमपि, शनकैस् तान् नृपश्रीर् अहासीत् ।
दोषव्रातोऽपगच्छेत् कथमयमिति मे दीर्घचिन्ताऽजनिष्ट,
मुद्राभी राजतीभिर् भवति शुभमिति प्रत्यभासीद् मतिर् मे ॥२७८॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मुद्राभी राजतीभिः सह हि जनपदे कूटमुद्राप्रचारे
संपन्ने राजकोषक्षतिरजनि, परं नो समर्घोऽजनिष्ट ।
तस्मात् सर्वत्र राज्ये व्यधिषि दृढतया कूटमुद्रानिरोधं,
मन्दं मन्दं समर्घोऽजनि, जनपदजैः सौख्यवर्षोऽन्वभावि ॥२७९॥

यैर् धूर्तैः कूटमुद्रा व्यरचि किमुत तत्संग्रहोऽकारि भूयांस्,
तेषां हानिं महिष्ठाम् अकृत मम नयस्, तेन ते मेऽभ्यकुप्यन् ।
अस्मद्मुद्राप्रचारो भवति चिरतरात् कालतो भोटदेशे,
तत्रत्या धर्ममुख्याः कतिचन बहुलाः कूटमुद्रा अचैषुः ॥२८०॥

सर्वा मुद्रा हिरण्योरणलवणमुखैर् वस्तुभिः पण्यभूतैः
प्राप्ता अस्मत्प्रजाभिर् विनियमविधिना पूर्वकालाऽगतेन ।
सर्वा नेपालमुद्रा दधति सदृशतां भोटदेशेऽस्मदीये,
तस्मात् तासां विभेदोऽनुचित इति वचो भोटनाथो ब्रवीति ॥२८१॥

वार्ता अस्मिन् प्रसङ्गे व्यधिषत बहुला अस्मदीयाश् च ते च
शान्त्यर्थं, किन्तु नाऽभूद् उभयजनमतो निर्णयोऽद्याऽपि कश्चित् ।
केषाञ्चित् स्वार्थहेतोः कथमिव सकलं पीडयेम स्वराष्ट्रं,
तस्मात् कार्यः प्रयत्नः सधृति दृढतया कूटमुद्रानिरोधे ॥२८२॥

धर्माऽधिकरणव्यवस्था

मूलपाठः

अदालथना पनि ठकुरि जाचि डिष्ठा राख्नु. मगर जाचि बिचारि थापनु. कचहरिपिछे यक् यक् पण्डीत राखी निजासास्त्रबमोजिम् अदालथ चलाउनु.

संस्कृतच्छाया

परीक्षितप् ठकुरिकुलजो मनुष्यो धर्माऽधिकरणे मुख्यः प्राड्विवाको भवतु । परीक्षितो मगरकुलजो मनुष्यो मुख्यस्य प्राड्विवाकस्य मुख्यः सहायको भवतु । प्रत्येकं धर्माऽधिकरणे धर्मशास्त्रज्ञः पण्डितो नियुक्तो भवतु । धर्मशास्त्रानुसारिणी दण्डव्यवस्था राष्ट्रे भवतु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमयी व्याख्या

उत्कोचं न ग्रहीता सुकृतरतमनाः पक्षपातं न कर्ता
साध्वाचारो मनुष्यो निजचरितबलाद् रक्षति न्याय्यमार्गम् ।
न्याय्यं मार्गं प्रपन्नो व्यवहृतिनिपुणो दृष्टभूरिक्रियश् च
शुद्धो नानोपधाभिष् ठकुरिरधिकृतः प्राड्विवाको विधेयः ।।२८३।।

तद्वच् शुद्धो नियोज्यो मगरकुलभवः प्राड्विवाकः सहायो,
न्याय्यो मार्गः स्वराष्ट्रे न भवतु निहतश् चेति चिन्ता विधेया ।
प्रत्येकं न्यायशाला स्मृतिविधिपटुना दृष्टलोकक्रियेण
साध्वाचारेण सम्यग् भवतु विलसिता ख्यातनाम्ना बुधेन ।।२८४।।

धर्माऽधर्मव्यवस्था स्मृतिषु सहफला श्रूयते वर्ण्यमाना,
दण्डान् दोषाऽनुसारान् अभिदधति बुधा धर्मशास्त्रप्रवीणाः ।
अस्माकं प्राड्विवाकाः स्मृतिविधिपटुभिर् न्यायशालानियुक्तैर्
विज्ञैः संमन्त्र्य सम्यग् विदधतु विधिवद् दण्डनीयेषु दण्डान् ।।२८५।।

धर्माधिकरणात् समुत्थं धनं धर्म्यासु क्रियासु नियोक्तव्यम्

मूलपाठः

अदालथका पैंसा दरबारभित्र महाल्नु. फकीर फकिडा अतित जोगि सन्न्यासि ब्राह्मणहरु इनैलाई दक्षिना भोजंन चलाईदिनु. उप्रेका पैसा बक्षिना चलाई धोति रुमाल चलाइदिनु. यस्व भया असत्यको दोस् लाग्दंन.

संस्कृतच्छाया

धर्मस्थीयाऽधिकरणेभ्यः कण्टकशोधनाऽधिकरणेभ्यश् च समुत्थं धनराशि राजा स्वकोषं न प्रवेशयेत् । विभिन्नसम्प्रदायाऽऽश्रितेभ्यो योगिभ्यो ब्राम्हणेभ्यश् च तेन धनेन भोजनं दक्षिणा च देयम् । अवशिष्टेन तेन धनेन तेभ्य एवाऽन्तरीयम् उत्तरीयरूपं च वस्त्रखण्डं वितरणीयम् । इत्थम् आचरन्तं राजानम् अधर्मो न स्पृशति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लोके प्रायः समस्ता व्यवहृतिविषया अर्थमेवाऽऽश्रयन्ते,
तस्यैवाऽर्थस्य हेतोर् विदधति बहुशो मानवा दुष्कृतीश् च ।
दण्डाद् उत्थोऽर्थराशिर् नरपतिसदनं चेद् विशेल् लिप्सुरर्थं
व्याजं कञ्चिद् विधाय क्षितिपतिरधिकं दण्डयेद् आढ्यमर्थम् ।।२८६।।
विद्याऽऽभ्यासं चरन्तः कतिचन सुधियस् तन्वते सद्विचारान्,
योगाऽभ्यासं चरन्तः कतिचन यतयो जानते गूढतत्त्वम् ।
स्वीयं सौख्यं त्यजन्तो गहनविषयकं तत्त्वमासेवमाना
वृत्त्या हीना जनास् ते जगति सुमतिभिः पूजनीया मनुष्यैः ।।२८७।।
वृत्त्यर्थं नाऽतितृष्णान् भुवनहितकृते सस्पृहान् सज्जनांस् तान्
सत्कर्तुं भूमिपालोऽर्हति गुरुमहितान् रक्षितुं संप्रदायान् ।
धर्मस्थीयात् समुत्थाद् द्रविणसमुदयाच् शोधनात् कण्टकानां
प्राप्ताच् च द्रव्यराशेर् वितरतु नृपतिर् भोज्यबस्त्रे हि तेभ्यः ।।२८८।।
रागं द्वेषं विमुञ्चन् नियममनुसरन् संत्यजन् पक्षपातं
साकं सभ्यैः सभायां व्यवहृतिविषयान् वीक्षते यो नृपालः ।
शुभ्रा कीर्तिस् तदीया विचरति धरणौ स्वाः प्रजा रञ्जयन्ती,
तद्हेतोः सैव कीर्तिर् विरचयतितरां शाश्वतं दिव्यधाम ।।२८९।।
दण्ड्यैर् दण्डो न लब्धः परिषदि यदि वा दण्डिता दोषहीना
राज्ञो यस्य प्रमादात्, स विशदयशसो धर्मतश् च च्यवेत ।
धर्मस्थीयाऽऽदिलब्धं द्रविणसमुदयं पात्रसात् कारयन्तं
पृथ्वीपालं तु दोषः स्पृशति न स इति श्रूयते धर्मशास्त्रे ।।२९०।।
पात्रसात्= पात्राऽधीनम्

आकरीयाया भूमेर् ग्रामोऽपसारणीयः

मूलपाठः

पानि भयाका ठाउमा गाउ भया पनि गाउ अरु जग्गामा सारिकन पनि पानि चलाउनु.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

आकरीयायां भूमौ वर्तमानं ग्रामम् अप्यन्यत्राऽपसार्याऽपि खनिः प्रवर्तनीया ।

पद्यमयी व्याख्या

अन्वर्था रत्नगर्भा विलसति, वसुधा चाऽस्ति साऽर्थाऽभिधाना,
शब्दद्वन्द्वं यथार्थं विदधति कुशला आकरज्ञानभाजः ।
नानारूपाः पदार्थाः समरविषयका भूरयो लौकिकाश् च
निर्मीयन्ते पदार्थैः खनिजनिभिरतः स्याद् व्यवस्था खनीनाम् ।।२९१।।

स्थाने स्थानेऽत्र देशे कतिचन खनयः सन्ति ताम्राऽदिकानां,
निस्सार्यन्ते च ताभ्यः खनिविधिकुशलैर् धातवो नेकरूपाः ।
खन्यध्यक्षः प्रवीणैः सह खनिकुशलैर् मन्त्रणां संविधाय
नूत्नानाम् आकराणां भवतु विचयने सर्वदा सप्रयत्नः ।।२९२।।

विचयने= अन्वेषणे

ग्रामाऽद्यै रुध्यमानाऽपि च धरणिरियं धातुरत्नाऽदिगर्भा
दृष्टेति क्ष्मापरीक्षाविधिकुशलजनाः सूचनां चेत् प्रदद्युः ।
भूयो भूयः परीक्षां समुचितविधिना कारयित्वा च कार्यं
तेषां ग्रामाऽदिकानाम् अपसरणमितः, सा खनिः संप्रवर्त्या ।।२९३।।

क्ष्मा= भूमिः

केदारीयाया भूमेर् गृहम् अपसारणीयम्

मूलपाठः

गह्रो बन्न्या जग्गामा घर भया पनि घर अरु जग्गामा सारि कुलो काटि षेत बनाई अबाद गर्नु.

संस्कृतच्छाया

केदारीयायां भूमौ वर्तमानं गृहम् अप्यन्यत्राऽपसार्य नवीनां कुल्यां विरचय्य केदारो रक्षणीयः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पद्यमयी व्याख्या

वृत्तिच्छेदे न कश्चित् प्रभवति मनुजो रक्षितुं जीवितं स्वं,
वाणिज्यं पाशुपाल्यं कृषिरिति विदिता वृत्तयः सन्ति तिस्रः ।
वर्तन्ते सार्थवाहाः कतिचन कतिचित् सन्ति मेषाऽदिपाला
देशेऽस्मिन्नस्मदीये कृषिविधिनिरता एव सन्ति प्रभूताः ॥२६४॥

अम्भोभिः सिच्यमाना धरणिरभिमतं सस्यराशिं प्रसूते,
व्योमस्थो वातनुन्नो दिशति जलधरो वारिधारां धरित्र्यै ।
वैमुख्यं दैवयोगाच् श्रयति जलधरे कर्षकेभ्यः स्वकीयो
वर्षव्यापी प्रयत्नोऽपि च दिशति फलं निःस्वतारूपमेव ॥२६५॥

वातनुन्नः= वायुप्रेरितः

स्वीये राष्ट्रे बुभुक्षा नहि वसतु, नदी मातृकोऽस्तु स्वदेशः,
क्षेत्राऽजीवा लभन्तां श्रमफलमुचितं चेति बुद्ध्या नृपालः ।
प्राचीनाः सेतुबन्धाः समयसमुचितां संस्क्रियाम् आप्नुवन्तु,
प्रत्यग्राणां च तेषां भवतु विरचना चेति चिन्तां करोतु ॥२६६॥

प्रत्यग्राणाम्= नवीनाना

केदारं नाशयित्वा प्रभवतु न जनः कोऽपि गेहं विधातुं,
केदारीया धरित्री यदि च जनपदे गेहरुद्धा क्वचित् स्यात् ।
तद् गेहं सारणीयं क्वचिदपि धरणौ वप्रतावर्जितायां,
कृत्वा कुल्यां नवीनां गृहवलयितभूः क्षेत्रतां प्रापणीया ॥२६७॥

केदारः = वप्रः = क्षेत्रम्

विप्रलम्भः

मूलपाठः

उप्रान्त ।। केही वेलामा हात दिनामा पस्या र मलाई झिकाया र पछाडि दगा दिया र महादुष गरि पछाडि युद्ध गरि नेपाललाई मुर्छा लाग्राथ्या.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

अथ कदाचन ममाऽनुकूलिकाः सन्तो माम् आह्वयन् । परं पश्चाद् मां विप्रालभन्त । अतिकष्टेन पार्ष्णिग्राहान् अपसार्य नेपालद्रोणीदेशं न्यरुन्धि ।

पद्यमयी व्याख्या

नेपालद्रोणिदेशात् ककुभि सुरपतेर् वर्तमानान् प्रदेशांस्
तत्रत्यान् पण्यमार्गांस् तुहिनशिखरिणं संश्रितान् भोटमाप्तॄन् ।
भूपालः सोऽधिकुर्यात् सुखमिव, सततं नालदूमाऽभिधाने
यस्य स्युः शैलदुर्गे विहितवसतयः सैनिका जागरूकाः ।।२९८।।

सुरपतेः ककुभि = पूर्वस्याम्

नेपालद्रोणिभाजो धरणिपरिवृढा मल्लवंशप्रसूता
अन्योन्यं स्पर्धमाना व्यधिषत समरांस् तस्य दुर्गस्य हेतोः ।
मन्वानः स्वाद् विपक्षाद् धरणिपरिवृढः शक्तिहीनं स्वपक्षम्
अस्मत्पक्षं स्वपक्षे रचयितुमभजत् षड् गुणान् राजकीयान् ।।२९९।।

भक्तग्रामाऽधिपाले रणजिति नृपतौ कान्तिदेशाऽधिपेन
राज्ञा वीरेण साकं विदधति कलहं तस्य दुर्गस्य हेतोः ।
भक्तग्रामस्य पक्षं रणभुवि सुभटा गोरखीया अगृह्णन्,
कान्तीशो भङ्गमाप्नोद्, अलभत रणजिद् दुर्गमुक्तं सुखेन ।।३००।।

अस्माकं सैन्यचक्रेऽपसरति च ततो दुर्गमेतज् जिघृक्षुर्
विक्रान्तः कान्तिनाथः पुनरपि पृतनां प्रेषयामास तत्र ।
जन्ये संजायमाने नृपतिरणजितो वाहिनीं द्रावयित्वा
कान्तिक्ष्मापालसेना पुनरपि विदधे नालदूमे स्ववासम् ।।३०१।।

आस्माकी गोरखीया पुनरपि पृतना नालदूमं समेत्य
कान्तिक्ष्मापालसेनां बहिरकुरुत तद्दुर्गतो भीषयित्वा ।
भक्तग्रामाऽधिपाले लषति पुनरिदं दुर्गरत्नं ग्रहीतुं
नाऽतिष्ठेऽहं तदानीं नृपतिरणजितो दुर्बले सैन्यचक्रे ।।३०२।।

स्थेयाऽर्थे तङ्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कान्तिक्ष्मापालकेन प्रसभमपहृतौ साँखु-चाँगु-प्रदेशा-
वावाभ्यां मोचनीयौ धरणिप भवतां तौ तवैवाऽधिकारे ।
एषा वाणी मदीया नृपतिरणजितः प्रीतये जायते स्म,
कालः संभूय गन्तुं रिपुनृपतिधराम् आवयोर् निश्चितोऽभूत् ।।३०३।।

कान्तिक्ष्मापालदुर्गं वशयितुमनसः सैनिका गोरखीया
निर्णीतं देशमेवाऽभ्युपगतसमये प्राप्नुवन्नभ्यमित्र्याः ।
सक्ते मां विप्रलब्धुं रणजिति नृपतौ स्वां प्रतिज्ञां विहाय
काचित् सेना तदीया रणभुवमभजद् नैव निर्दिष्टकाले ।।३०४।।

अभ्यमित्र्याः = शत्रुं प्रति गन्तारः

भक्तग्रामाऽधिपालाच् श्रुतसकलकथः कान्तिदेशाऽधिपालस्
तस्मिन् दुर्गे तदानीं निजबहुपृतनां कारयामास सज्जाम् ।
मत्का स्वल्पप्रमाणा रणभुवि पृतना भङ्गमाप्नोद् महान्तं,
पार्ष्णिग्राहेभ्य आसन् विकटतरदरा गोरखामूलदुर्गे ।।३०५।।

मत्का = मदीया

दराः = भीतयः

पार्ष्णिग्राहान् समस्तान् बहुविधयतनैर् दूरतः संविधाय
सोढ्वा सोढ्वाऽतिकष्टं पुनरपि नयने प्राक्षिपं मल्लराज्ये ।
गुल्मानां संनिवेशं समुचितविधिना कारयन् सर्वमार्गान्
नेपालद्रोणिमाप्तॄन् सबलपृतनया सर्वतोऽहं न्यरुन्धि ।।३०६।।

नागानां (योगिब्रुवस्य सैनिकानां) विनिपातः

मूलपाठः

जयप्रकास मल्लका मतलप्लाई दखिनबाट नागा झिकाया र नेपालभित्र पस्न नदि सातगाउभित्रैमा भिजानां.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतच्छाया

मल्लवंश्यस्य जयप्रकाशस्य नृपतेः सहायतायै दक्षिणस्या दिशो (भारताद्) नागान् आह्वयन् । नेपालद्रोणीम् अप्रविशत एव तान् अहं सप्तसु ग्रामेषु भूमिवर्वनान् अकरवम् ।

पद्यमयी व्याख्या

आस्ते गोरक्षनाथो जगति सुविदितो योगिराजाऽधिराजः,
सोऽस्माकं देशमेतं श्रयति करुणया भक्तसिद्धिप्रदायी ।
नाम्ना तस्याऽस्मदीयो वहति जनपदश् चैष गोरक्षनाम,
चित्ते तं शुद्धभक्त्या स्वकुलसुमनसं सर्वदा भावयामि ।।३०७।।

स्वकुलसुमनसम् = निजकुलदेवताम्

तत्संबन्धाद् ममाऽऽस्ते यतिजनविषया निर्मला भक्तिधारा,
साकं मे ख्यातनाम्ना समजनि यतिना संगमो दैवयोगाद् ।
उत्साहं मामकीनं समरविषयकं संनिशम्याऽऽदरेण
मह्यं प्रादात् स योगी प्रकटितसुमना आशिषोऽनेकरूपाः ।।३०८।।

प्रज्ञायां तिष्ठमानः, समरभुवि परं दर्शयन् साहसं स्वं,
कुर्वाणः स्वप्रजानां हितमधिकमिलां भासयन् स्वीयकीर्त्या ।
जित्वा माकन्ददेशं तदुदितवसुना वाहिनीं वर्धयन् स्वां
नेपालद्रोणिदेशं सबलपृतनया सर्वतोऽहं न्यरुन्धि ।।३०९।।

प्रज्ञायां तिष्ठमानः = बुद्धिं स्थैर्यतया समाश्रयन्

इलाम् = पृथिवीम्

वसुना = धनेन

वाहिनी = पृतना = सेना

त्वत्सिद्ध्यर्थं करोमि व्रतनियमरतो देवताऽऽराधनानि,
मद्दत्ताऽऽशीःप्रभावात् समरभुवि रिपून् ईशिषे त्वं विजेतुम् ।
एतावद् राज्यमाप्नोः, प्रतिदिनमिव ते विस्तृतिं राज्यमेति,
मह्यं राज्यांऽशमेकं वितरितुमपि ते वर्तते काल एषः ।।३१०।।

ईशिषे = समर्थोऽसि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रावोचं विस्मितः सन् यतिवरगदितां वाचमेतां निशम्य,
कोऽर्थो राज्येन साध्यो भवति यतिपतेर् मुक्तिमार्गं प्रपित्सोः ।
राष्ट्रस्यैक्यं विधातुं निशमपि दिवसीकृत्य यत्नं करोमि,
संयुक्तं राष्ट्रमेतद् विघटयितुमथ स्यां कथं सोऽहमीशः ॥३११॥

प्रपित्सोः = प्राप्तुम् इच्छोः

ईशः = समर्थः

श्रुत्वेदं मामकीनं प्रतिवचनमतिक्रोधसंदीप्तचेताश्
चक्रे योगिब्रुवोऽसौ सह नरपतिभिर् मल्लवंश्यैः सखित्वम् ।
आगच्छद् योगिसेना प्रहरणबहुला भारताद्, मामकीनैः
सप्तग्रामेषु योधैं रणशिरसि हता साऽभजत् प्रेतलोकम् ॥३१२॥

योगिब्रुवः = अयोगिनम् अपि आत्मानं योगी इति ब्रुवाणः

मीरकासिमस्य पराजयः

मूलपाठः

कास्मेरिषान् नवाफ् मकवानपुरमा चढचो र छअबिस् षो (घो) डाले काटि घर्काई सिवाना कटाई आजां.

संस्कृतच्छाया

कासिमअलीखाँनामको वङ्गराजो माकन्ददेशपर्वतम् आरोहत् । विंशेन शतेनाऽश्ववारैस् तं विजित्याऽनुद्रुत्य च स्वराज्यसीमाया बहिर् अकरवम् ।

पद्यमयी व्याख्या

माकन्दक्ष्माऽधिपालो व्यवहृतिनिपुणो हेमकर्णाऽभिधानः
पाणिग्राहः स्वपुत्र्या इति मयि सरसां दर्शयन् बाह्यवृत्तिम् ।
यावज्जीवं न वैरं स्फुटतरमभजत्, स्वर्गलोकं प्रयाते
ताते दिग्बन्धनोऽभूद् धरणिपरिवृढो हेमकर्णस्य सुनूः ॥३१३॥

स्वपुत्र्याः पाणिग्राहः = जमाता

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नव्यो माकन्दराजः सह मम रिपुभिः सख्यबन्धं वितन्वन्–
नुद्योगं मामकीनं विफलयितुमपि स्वाम् उपायुङ्क्त शक्तिम् ।
माकन्दक्षोणिनाथं वशयितुमभवन् सोद्यमा गोरखीया,
युद्ध्वा कञ्चित् स कालं नरपतिरभवत् क्वाऽपि दूरे विलीनः ।।३१४।।

नव्यो माकन्दराजः = दिग्बन्धनसेनः

माकन्देशस्य हर्म्यं व्यतनुत रुचिरं गोरखावैजयन्ती,
यास्या सीमाऽस्मदीया मुगलनरपतेर् अस्पृशत् सौम्यसीमाम् ।
सस्यैर् आढ्यां धरित्रीं वनमपि विविधैर् वस्तुभिर् हस्तिभिश् च
संपन्नं प्राप्य लक्ष्मीर् विकसितवदना गोरखीयाऽभवच् च ।।३१५।।

माकन्देशस्य हर्म्यम् = मकवानपुरराजस्य प्रासादम्

गोरखावैजयन्ती = गोरखाराजस्य ध्वजः

आस्तां दण्डोऽस्मदीयो दृढबलसहितः स्थायिताम् आददानो,
ध्यात्वैतत् सैन्यवर्गाः कतिचन विहिता नूतनं कोषमाप्य ।
हिन्दूनां सैन्यशक्तिः पुनरपि च नवं जीवनं प्राप्तुकामा
सम्पन्नेति प्रभूतां क्रुधमपि दधतो म्लेच्छवर्ग्या अभूवन् ।।३१६।।

स्वामिनं स्वकपटेन सिराजं वङ्गनायकमपास्य सिताऽस्यम् ।
तोषयन् धनचयेन बलेशो मीरजाफर इलापतिरास ।।३१७।।

सिताऽस्यम् = गौरमुखम् = आङ्ग्लम्

बलेशः = सेनापतिः

इलापतिः = राजा

मीरजाफरमपास्य तथैव मीरकासिम इलापतिरास ।
वङ्गभूमिरभवद् गतलक्ष्मीस्, तच्छ्रियं सितमुखा अलभन्त ।।३१८।।

गौराऽस्याः सार्थवाहाः कनकसमुदयं शीघ्रमेवाऽर्जयित्वा
स्वं देशं गन्तुमैच्छन्, जगति सुविदिताऽऽसीद् धनाया तदीया ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वङ्गक्ष्मापालपीठेऽपि च निजमनुजं ते निधातुं समर्थाः
शुल्का।ऽदानेन भूपं प्रकृतिमतितरां स्वैरमूल्यैर् अदुन्वन् ।।३१९।।
घनाया= लोभः
स्वैरमूल्यैः = स्वैर् अभिमतैर् मूल्यैः
अदुन्वन्= अपीडयन्

वाह्याद् देशाद् उपेताः कतिचन वणिजो भूमिपालं प्रजाश् च
प्रत्यक्षं पीडयन्तोऽपि च विगतभयाः संचरन्तीति खिन्नः ।
अत्याचारं निरोद्धुं प्रयतनमकरोत् कासिमो वङ्गनाथः,
स्वीयो लाभोऽपगच्छेद् इति सितवदनाश् चुक्रुधुः कासिमाय ।।३२०।।

मीरजाफर उपैतु नृपत्वं, भूय एष वितनोतु हितं नः ।
कासिमः पततु भूपतिपीठाद्, भावमेतमदधुश् च सितास्याः ।।३२१।।

दुर्लङ्घ्ये क्वाऽपि शैले दृढतरघटितं दुर्गमस्तु स्वकीयम्,
आपत्तौ दुर्गमेतद् भवतु शरणदं दुर्ग्रहं द्विड्ध्वजिन्या ।
दुर्गं संश्रित्य चैतत् सितमुखपृतनां युद्धभूमौ विजित्य
वङ्गेशो निःसपत्नो भवितुमतितरां कासिमो वाञ्छति स्म ।।३२२।।
द्विड्ध्वजिन्या = शत्रुसेनया
सितमुखपृतनाम् = आङ्ग्लसेनाम्

लब्धे भङ्गे समीकेऽनुभवति हृदये क्रोधमात्रं प्रकामं,
स्वस्माद् अस्माद् उपायात् प्रभवति कतमोऽपाय एतद् विवेक्तुम् ।
नो शक्ता दुर्विनीताः कतिचन पुरुषा भूपदिग्बन्धनस्य
प्रोचुर् गोरक्षरन्ध्रं यवननरपतिं कासिमं वङ्गनाथम् ।।३२३।।
समीके = युद्धे

श्रुत्वा वृत्तान्तमेतं प्रमुदितहृदयः कासिमो हैमकर्णिं
लब्ध्वा सोपानरूपं तुहिनशिखरिणं रोद्धुकामो बभूव ।
नेपालं जेतुमिच्छोर् घटितबहुबला वाहिनी वङ्गभर्तुः
स्कन्धावारं स्वकीयं सुखमिव निदधे प्राप्य माकन्दभूमिम् ।।३२४।।
हैमकर्णिम् = हेमकर्णस्य पुत्रं दिग्बन्धनम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संनद्धैः सांयुगीनैर् यवननृपचमूर् गोरखीयैर् हठेना-
ऽऽक्रान्ता क्षीणत्वमाप्नोद् भयचकितमनाः कान्दिशीकी बभूव ।
आस्माका अश्ववाराः खभुजशशि १२० मिता अन्वगुर् म्लेच्छसेनाम्,
आयुः स्वं त्रातुकामा द्रुततरचरणा प्राद्रवत् सा सुदूरम् ।।३२५।।

कान्दिशीकी = भयेन पलायिता

भङ्गं लब्ध्वा निवृत्ते महति निजबले कासिमोऽभूद् निराशस्,
तत्साहाय्येन लिप्सोर् निजपदमगमद् हैमकर्णेर् दुराशा ।
अस्मत्सैन्यैर् गृहीते समिति गृहजने तद्वियोगव्यथाऽऽर्त्तः
कान्तासौख्यं समीप्सुः स्वयमभजत मे मन्दिरं हैमकर्णिः ।।३२६।।

समिति = युद्धे

आङ्ग्लानां पराजयः

मूलपाठः

तिन चार पल्टन् लिएर सिङुली गढिमा हांडीसाहेब चढ्यो र वा बाही पनि काटि पथर्काला च्याति ल्याना र

संस्कृतच्छाया

त्रिचतुराणि सहस्राणि सैनिकान् आदाय हाँडिनामक आङ्ग्लसेनापतिः सिंधुलिदुर्गम् आरोहत् । तम् अपि विजित्य वह्निशस्त्राणि प्रसभम् अपाहरम् ।

पद्यमयी व्याख्या

नेपाले भोटदेशेऽपि च सितवदनाः पण्यवृत्त्या चरन्तः
प्रत्यब्दं स्वीयदेशं कनकसमुदयं नेतुमीशा बभूवुः ।
संपूर्णे शैलराजे सति निजवशगे स्वर्णराशिं यथेच्छं
संचेतुं स्याम शक्ता इति तुहिनगिरिं जेतुमाङ्ग्ला ववाञ्छुः ।।३२७।।

सितवदनाः = आङ्ग्लाः

शैलराजः = तुहिनगिरिः = हिमालयः

स्याम = भवेम

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गौरा।ऽस्याः सार्थवाहा विधृतपरिकराः शैलराजं विजेतुं
जिज्ञासाञ्चक्रिरे तद्गिरिपथसरितो राजकीयं च वृत्तम् ।
धर्मा।ऽचार्यस्वरूपाः कतिचन, कतिचिद् विज्ञवैद्यस्वरूपा,
आजग्मुर् गौरवक्त्रा नवतरकुतुकै रञ्जयन्तो मनुष्यान् ॥३२८॥

क्षुद्रे राज्ये प्रभुत्वं मनसि च नितरां क्षुद्रभावं दधाना
दूरं द्रष्टुं न शेकुस् तुहिनगिरितलं शासतो भूमिपालाः ।
तान् भूपान् रञ्जयन्तो निजचतुरतया तद्रहस्यं च बुद्ध्वा
चारा निश्चिक्युरेते तुहिनशिखरिणो जय्यताया उपायम् ॥३२९॥

जय्यतायाः = जेतुं शक्यतायाः

कस्मिंश्चिद् भूमिपाले निजचरनयनैर् दुश्चरित्रं तदीयं
ज्ञात्वा राज्यात् स्वकीयाद् अपनयति चरान् गौरवक्त्रान् प्रसह्य ।
तत्प्रत्यर्थी समीपो नरपतिरपरो गौरवक्त्रोपहारैस्
तुष्टः स्तुत्या च तेभ्यो निजभुवि वसतिं सा।ऽदरं यच्छति स्म ॥३३०॥

कुर्वंत्यः स्वीयकृत्या नियममनुगताः स्वप्रजाः प्राप्नुवन्तु
भोज्यं वस्त्रं च वासं, भयरहितहृदः सन्तु ताः कर्मनिष्ठाः ।
संप्राप्ता आधमर्ण्यं धनिकहृतपशुक्षेत्रगेहा।ऽदिकास् ता
दैन्यव्याप्ता बुभुक्षाविकलपरिजना न त्यजन्तु स्वदेशम् ॥३३१॥

एतां चिन्तां दधाने मयि नृपतिनयं सेवमाने रसेन
प्राज्या लोका अभूवन् मदनुसृतिपरा बिभ्रतो मत्सखित्वम् ।
लघ्वाकारान् अनेकांस् तुहिनशिखरिणं संश्रितान् भूमिभागान्
एकीकर्तुं प्रसक्तोऽभजत च फलितां प्रत्यहं मत्प्रयत्नः ॥३३२॥

वाणिज्या।ऽढ्यं यथेच्छं जनधनहरणं तस्करत्वं चरन्तो
धूर्ता मर्त्या अभूवन् कतिचन विकला मद्नये द्योतमाने ।
प्रत्यब्दं शैलराजात् करमिव कनकं स्वीयदेशं नयन्तो
गौरा।ऽस्याः सार्थवाहा अधिषत हृदयैः कृष्णताम् आननैश् च ॥३३३॥

अन्तःसंघर्षशीला लघुतरविषया एकतावर्जितत्वात्
क्षुद्रत्वाच् च स्वकीयां जननभुवममी रक्षितुं शक्नुयुर् न ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इत्याकारं विचारं वहति रिपुरतः शैलराजं जिगीषुर्
गौराऽऽस्यो मत्प्रयत्नं कथमिव सुदृशा वीक्षितुं स्यात् समर्थः ।।३३४।।

उद्योगं मामकीनं सकलमपि वृथा कर्तुकामाः सिताऽऽस्या
लोकाः स्युर् मद्विरोधे बहव इति धिया दुर्यशो मे व्यतन्वन् ।
ते धूर्ताः सार्थवाहाः परजनपदजा अस्मदीयं रहस्यं
ज्ञातुं न स्युः समर्था इति निजविषये तत्प्रवेशं न्यरुन्धि ।।३३५।।

व्याचक्षाणाः सुमार्गं सुकृतविधिमपि क्रैस्तधर्माऽऽख्यं चरन्तो
वर्तन्ते योगिनोऽमी इति सितयतिनां न प्रवेशं न्यषेधम् ।
किन्त्वेते लब्धरन्ध्राः सह मम रिपुभिर् बद्धसख्या मदीयं
वृत्तान्तं मां जिघांसोः सितवदनपतेः प्रापयन्ति स्म कर्णम् ।।३३६।।

सितयतिनाम् = गौराणां योगिनाम् = क्रैस्तवधर्माऽऽचार्याणाम्

आसीत् सेना विशाला मुगलकुलभवा, साम्प्रतं सा विशीर्णा,
दीर्घा साम्राज्यसीमा प्रतिदिनमधुना सेवते लाघवं च ।
क्षीणेऽप्येवं प्रभावे कुलभवमहिमा यस्य जागर्ति लोके,
तद्माहात्म्याद् वरेण्यं वहति च भुवि यो भारतेशाऽभिधानाम् ।।३३७।।

साक्षात् सोऽयं प्रसिद्धो मुगलकुलजनी राजराजाऽधिराजो
भर्त्रा बङ्गालभूमेर् अवधनृपतिना चैव संभूय योद्धुम् ।
आगच्छद्, भूमिपालत्रितयसमुदिता वाहिनी सा विशाला
जिग्ये लब्धाऽऽपि चम्वा सितवदनपतेर् बक्सरे युद्धभूमौ ।।३३८।।

सोऽयं राजाऽधिराजो मुगलकुलजनिर् बक्सरे भङ्गमाप्य
लिप्सुर् गौराऽऽस्यसख्यं क्षतकुलविभवं तत्प्रसादं ववाञ्छ ।
सामन्तत्वं विशिष्टं मुगलकुलपतिर् गौरवक्त्राय दत्त्वा
स्वीचक्रे तत्प्रभुत्वं नतमलिनमुखो वङ्गदेशे विहारे ।।३३९।।

लब्धे राज्याऽधिकारे सितमुखपतिना वङ्गदेशे विहारे
याम्या सीमाऽऽस्मदीया समगत सहसा सौम्यया तस्य सीम्ना ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्मद्देशं विविक्षुः सितवदनपतिः सार्थवाहाऽधिराजो
मां न्यक्कर्तुं प्रसक्तोऽवसरमुपगतं संमुखं वीक्षते स्म ।।३४०।।

याम्या = दक्षिणा

सौम्यया = उत्तरया

समगत = समगच्छत = संयुक्ता भवति स्म

मल्लानां भूमिपानां हितमिव विदधद् न्यायवादिस्वरूपं
धृत्वा गौरा।ऽननेशोऽकुरुत मम कृते न्याय्यमार्गोपदेशम् ।
बुद्ध्वा तद्गूढभावं मयि नयसरणि पूर्ववत् सेवमाने
नेपालं स्वं विधित्सुः सितवदनपतिः प्रेषयामास सेनाम् ।।३४१।।

चूरेर् अद्रेर् अवाची न भवति धरणिः सांयुगीनेति, सेना
शत्रोर् मार्गं रुरुत्सुः सिँधुलिपरिसरे गोरखीया न्यवात्सीत् ।
संप्राप्तायां ध्वजिन्यां सितवदनपतेस् तत्र संग्राम आसीत्,
लब्ध्वा भङ्गं महान्तं भयचकितमनाः प्राद्रवच् शत्रुसेना ।।३४२।।

अवाची = दाक्षिणात्या

सांयुगीना = रणे साधुः

रुरुत्सुः = रोद्धुम् इच्छुः

ध्वजिन्याम् = सेनायाम्

स्वप्राणाँस् त्रातुकामा द्रुततरगतयो गौरवक्त्रस्य सैन्याः
स्वीयानाम् आयुधानाम् अवनमपि तदा नाऽभवन् कर्तुमीशाः ।
निघ्नन्तः शत्रुसैन्यान् प्रहरणनिकरं वह्निशस्त्रप्रधानं
शत्रूणाम् आददाना रणभुवि सुभटा गोरखीया अनन्दन् ।।३४३।।

अवनम् = रक्षणम्

ईशाः = समर्थाः

तिलङ्गानामा सैनिकवर्गः

मूलपाठ :

लषनँबाट तिन् मुसल्मां मेरो चाकरिलाई नुवाकोटमा पिछा परि आयाका थिया. ईनँ बन्दुक्को तुलकलायेत तिनँ मुसरमानले जान्याको रहेछ र

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सेषजरवर ममतकि भेषार्सिं तिनै जनालाई अजिटन्ती दिया र तिलंगा सधायाको हो.

संस्कृतच्छाया

वह्न्यस्त्राणां (बन्दूक) रचनां प्रयोगं च जानन्तः शेखजरवरः ममतकिः भेखार्सिङः इति नामानि दधानास् त्रयो मुसलमाना लखनउप्रदेशाद् वृत्तिकामा नुवाकोटे माम् अभ्यागच्छन् । तेभ्योऽहं सेनापतिसहायक इति पदम् अददाम् । ते गोरखीयान् सैनिकान् वह्निशस्त्रक्रियायां व्यनयन् । ततस् तिलङ्गानामा गोरखीयः सैन्यवर्ग उदपद्यत ।

पद्यमयी व्याख्या

वह्न्यस्त्रज्ञानभाजो मुसलिमकुलजाः सांयुगीनास् त्रि३संख्या
आगच्छन् वृत्तिकामा लखनउनगराद् मां नुवाकोटदुर्गे ।
ते सैन्यान् गोरखीयान् व्यधिषत निपुणान् वह्निशस्त्रप्रयोगे,
नूत्नस् तैलिङ्गनामाऽलभत जनिमथो सैन्यवर्गोऽस्मदीयः ॥३४४॥

नेपालद्रोणीं मुगलभूपो भोक्ष्यतीति लोकप्रवादः

मूलपाठः

